०॥श्रीकार्त्तिकमाहात्म्यआरंभः॥०

Shri Kartikamaahaatmya

21/2 ✓

कार्त्ति॰ श्रीगणेशायनमः ॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं । देवींसरस्वतींव्यासंततोजयमुदीरयेत् । ॥सूतउवाच॥
॥१॥ श्रियःपतिमथामंत्र्यगतेदेवर्षिसत्तमे । हर्षोत्फुल्लाननासत्यावासुदेवंतदाब्रवीत् । सत्योवाच । ॥धन्यास्मि
कृतकृत्यास्मिफलितंजीवितंमम । मज्जन्मानि[illegible]नौचैवधन्यौतौपितरौमम । योमांत्रैलोक्यसुभगांजनयामास
तुर्ध्रुवं । षोडशस्त्रीसहस्राणांवल्लभाहंयतस्तव । यस्मान्मयादिपुरुषःकल्पवृक्षसमन्वितः । यथोक्तविधि
नासम्यक्नारदायसमर्पितः । नयद्वार्त्तांविजानंतिभूमिसंस्थाहिजंतवः । सोयंकल्पद्रुमोगेहेममतिष्ठतिसां
प्रतं । त्रैलोक्याधिपतेश्चाहंस्त्रीपतेरतिवल्लभा । अतोहंप्रष्टुमिछामिकिंचित्वांमधुसूदन । यदित्वंमत्प्रियकरः
कथयस्वाद्यतत्रविस्तरं । श्रुत्वातद्वैपुनश्चाहंकरोमिहितमात्मनः । यथाकल्पंत्वयादेववियुक्तास्यांनकर्हिचित् ॥
सूतउवाच । ॥इतिप्रियावचःश्रुत्वास्मेरास्यःसबलाग्रजः । सत्यकेरेकरंकृत्वाध्ययात्कल्पतरोस्तलं । निषि
ध्यानुचरंलोकंसविलासंप्रियान्वितः । प्रहस्यसत्यामामंत्र्यप्रोवाचजगतांपतिः । तत्प्रीतिपरितोषोत्फुल्लस
स्फुलकिर्त्तागकः । ॥श्रीकृष्णउवाच । ॥नमेत्वत्तःप्रियतमाकाचिदस्तिनितंबिनी । षोडशस्त्रीसहस्राणांप्रि ॥१॥
येप्राणप्रियाह्यसि । त्वदर्थेदेवराजोपिविरुद्धोदैवतैःसह । त्वयायत्प्रार्थितंकांतेशृणुतच्चमहद्भवेत् । अदेय
मप्यथवाकार्यमकथ्यमपियत्पुनः । किंकरोमिकथंप्रश्नंकथयामितवप्रिये । तत्सछसर्वंकथयेयत्तेमनसिवर्त्तते ।

॥सत्योवाच॥ ॥दानंव्रतंतपोवापिकिंतुपूर्वंकृतंमया। येनाहंमर्त्यजामर्त्यभावातीताभवंकिल। तवार्द्धांगहरानि
त्यंगरुडासनगामिनी॥ इंद्रादिदेवतावासमगामंचतथासह। अतस्त्वांपरिपृछामिकिंकृतंतुमयाशुभं। भवांत
रेचकिंशीलाकाचाहंकस्यकंन्यका। श्रीकृष्णउवाच॥ ॥शृणुष्वैकमनाकांतेयथात्वंपूर्वजन्मनि। पुण्यंव्रतंकृतव
तीतत्सर्वंकथयामिते। आसीत्कृतयुगस्यांतेमायापूर्यांद्विजोत्तमः। आत्रेयोदेवशर्मेतिवेदवेदांगपारगः॥आ
तिथेयोग्निशुश्रूषीसौरव्रतपरायणः॥ सूर्यमाराधयन्नित्यंसाक्षात्सूर्यइवापरः॥ तस्यातिवयसश्चासीन्नाम्ना
गुणवतीसुता। अपुत्रःसशिष्यायचंद्रनाम्नेददौसुतां। तमेवपुत्रवन्मेनेसचतंपितृवद्वशी॥ तौकदाचिद्वनंया
तौकुशेध्माहरणार्थिनौ॥ हिमाद्रिपादजवनेचेरतुस्ताविस्ततः॥ तावत्तौराक्षसंघोरमायांतंप्रपश्यतुः॥ भय
विह्वलसर्वांगावसमर्थौपलायितुं। निहतौराक्षसातेनकृतांतसमरूपिणा। तौतत्क्षेत्रप्रभावेनधर्मशीलतया
पुनः॥ वैकुंठभुवनंनीतौमद्गणैर्मत्समीपगैः॥ यावज्जीवंतुयत्ताभ्यांसूर्यपूजादिकंकृतं। तेनाहंकर्मणाताभ्यांसु
प्रीतस्त्वभवंकिल। शैवाःसौराश्चगाणेशावैष्णवाःशक्तिपूजकाः॥ मामेवयेप्राप्नुवंतिहिवर्षापःसागरंयथा॥
एकोहंपंचधाभूतःक्रीडयानामभिःकिल। देवदत्तोयथाकश्चित्पुत्राद्याह्वाननामभिः॥ ततस्तौमद्भुवनाधि
वासिनौविमानयानौरविवर्चसावुभौ। मत्तुल्यरूपौममसन्निधानगौदिव्यांगनाचंदनभोगभागिनौ॥ ॥
॥इतिश्रीपद्मपुराणेकार्तिकमाहात्म्येकृष्णसत्यभामासंवादेप्रथमोध्यायः॥ ॥श्रीकृष्णउवाच॥ ॥ततोगुण

वतीश्वशुरश्चारक्षसानिहतावुभौ॥पितृभर्तृजदुःखार्ताकरुणंपर्यदेवयत्॥ ॥गुणवत्युवाच॥ ॥हानाथहापितस्त्य
॥२॥ क्त्वामांक्वगतःक्मयाविना॥बालाहंकिंकरोम्यद्यहनाथाभावितोर्विना॥कोनुमांस्वास्थितांगेहेभोजनाछादनादिभिः
अकिंचिकुशलांस्नेहात्पालयिष्यतिदुःखितां॥हतभाग्याहतस्त्वाहंहतास्म्यहंतजीविता॥शरणंकंव्रजाम्यद्ययो
मेदुःखंप्रमार्जयेत्॥कंयास्यामिक्वतिष्ठामिकिंकरोमिवृथाधृणा॥विधाहाहहतास्म्यद्यकथंजीवामिबालिशा॥
॥श्रीकृष्णउवाच॥ ॥एवंबहुविलाप्याप्यकुररीवभृशातुरा॥पपातभूमौविकलारंभावात्तहतायथा॥चिरात्स
श्वास्यसाभूयोविलप्यकरुणंबहु॥निमग्नाशोकजलधौदुःखितासमवर्त्तत॥साग्रहोपस्करान्सर्वान्विक्री
यास्तुभकर्मकृत्॥तयोश्चक्रेयथाशक्तिसापारलौकिकींक्रिया॥तस्मिन्नेवपुरेस्वक्रेवासंप्रभृतिजीविनी॥वि
ष्णुभक्तिरताशांतासत्यशौचादितत्परा॥व्रतद्वयंतयासम्यग्आजन्ममरणात्कृतं॥एकादश्याव्रतंसम्यक्सेवनंका
र्त्तिकस्यच॥एतद्व्रतद्वयंकांतेममात्तीवप्रियंकरं॥भुक्तिमुक्तिप्रदंपुण्यंपुत्रसंपत्तिदायकं॥कार्त्तिकेमासिये
नित्यंतुलासंस्थेदिवाकरे॥प्रातस्नास्यंतितेमुक्तामहापातकिनोपिच॥स्नानंजागरणंदीपंतुलसीवनपा
लनं॥कार्त्तिकेचप्रकुर्वंतितेनराविष्णुमूर्त्तयः॥संमार्जनंविष्णुगृहेस्वस्तिकादिनिवेदनं॥विष्णोःपूजांचयेकु ॥२॥
र्युर्जीवन्मुक्तास्तुतेनराः॥इत्थंदिनत्रयमपिकार्त्तिकेयेप्रकुर्वते॥देवानामपितेवंद्याःकिंयैराजन्मतःकृतं॥
इत्थंगुणवतीसम्यक्प्रत्यब्दंव्रतिनीह्यभूत्॥नित्यंविष्णोःपरिकरेभक्त्यातत्परमानसा॥कदाचित्सजरयाक्रां

सर्वेपिकालावयवास्त्वत्कालस्वरूपिणः॥समानस्तुकथंनाममासानांकार्त्तिकोवरः॥एकादशीतिथीनांचमा
॥३॥ सानांकार्त्तिकप्रियः॥कथंतेदेवदेवेशाकारणंकिंचकथ्यतां॥ ॥श्रीकृष्णउवाच॥ ॥साधुपृष्टंत्वयाकांतेश्रृणु
ष्वैकाग्रमानसा॥पृथोर्वैन्यस्यसंवादंमहर्षेर्नारदस्यच॥एवमेवपुरापृष्टोनारदःपृथुनातदा॥उवाचकार्त्ति
काधिक्यंकारणंसर्वविन्मुनिः॥ ॥नारदउवाच॥ ॥शंखनामाभवत्पूर्वमसुरःसागरात्मजः॥त्रिलोकीमथ
नेशक्तोमहाबलपराक्रमः॥जित्वादेवान्निराकृत्यस्वलोकात्समहासुरः॥इंद्रादिलोकपालानामधिकारांत
दाहरत्॥तद्भयादथतेदेवाःसकलत्रागिरिगुहागताः॥न्यवसन्बहुवर्षाणिसपुत्रोधाःसवासवाः॥सकलत्रा
गिरिगुहादुर्गसंस्थितास्त्रिदशास्तदा॥तद्वन्याहतोबभूवस्तेतदादैत्योविचारयत्॥दूराधिकारास्त्रिदशाममयाय
द्यपिनिर्जिताः॥तस्यंतेबलयुक्तास्तुकरणीयंमयात्रकिं॥अज्ञास्वातुकथंदेवावेदमंत्रबलान्विताः॥तान्हृ
त्थ्येततःसर्वेबलहीनाभवंतिवै॥ ॥नारदउवाच॥ ॥इतिमत्वाततोदैत्योविष्णुमालक्ष्यनिद्रितं॥सत्यलो
कात्जहाराशुवेदान्वैसस्वयंभुवः॥नीतास्तेतेनयेवेदास्तद्भयात्तेनिराक्रमात्॥तोयानिविविशुर्यज्ञमंत्रबी
जसमन्विताः॥तान्मार्गमाणोशंखोपिसमुद्रांतरगोभ्रमत्॥सदरैस्तदादैत्यःक्वचिदेकत्रसंस्थिताः॥अ ॥३॥
थब्रह्मासुरैःसार्धंविष्णुंशरणमन्वगात्॥पूजोपकरणान्यादायवैकुंठभुवनेगतः॥तत्रतस्यप्रबोधायगीत
वाद्यादिकाःक्रियाः॥चक्रुर्देवास्तथाधूपगंध॥धदीपान्मुहुर्मुहुः॥अथप्रबुद्धोभगवान्सद्भक्तिपरितोषितः॥

मीज्वरपीडिता ॥ स्नातुं गंगां गता कांते कथंचिच्छनकैस्तदा ॥ यावज्जलांतरगता कंपती शीतपीडिता ॥ तावत्सा
विष्णुलापश्यद्विमानं यातमंबरात् ॥ विष्णुरूपधरैः सम्यक् वैनतेयध्वजांकितं ॥ आरोप्यैहान्विमानं तामप्सरो
गणासेवितां ॥ चामरैर्व्यजमानां तैर्वैकुंठमद्रुपानयन् ॥ अथ सा तद्विमानस्था ज्वलदग्निशिखोपमा ॥ कार्त्ति
कव्रतपुण्येन मम सान्निध्यगाभवत् ॥ अथ ब्रह्मादिदेवानां यथा प्रार्थनया भुवं ॥ आगतोहं गणाः सर्वे याता
स्तेपि मयासह ॥ एतेहि यादवाः सर्वे मद्गणा एव भामिनि ॥ पिता ते देवशर्माभूत्सात्राजितो प्रियो ह्यहं ॥ यश्चं
द्रनामा सा कृष्ण स्त्वं सा गुणावती शुभा ॥ कार्त्तिकस्नानपुण्येन बहु मत्प्रीतिदायिनी ॥ मम द्वारि त्वया पूर्वं तुलसी
वाटिकाकृता ॥ तस्मादियं कल्पवृक्षस्तवांगणगतः शुभे ॥ कार्त्तिके दीपदानं च यत्कृतं च त्वया पुरा ॥ त्वद्देहगे
हसंस्थेयं तस्माल्लक्ष्मीः स्थिराभवत् ॥ यच्च व्रतादिकं सर्वं विष्णवे भर्त्तृरूपिणे ॥ निवेदितवती तस्मान्मम भार्या
त्वमागता ॥ आजन्ममरणात्पूर्वं यत्कार्त्तिकव्रतं कृतं ॥ कदाचिदपि तेन त्वं मद्वियोगं न यास्यसि ॥ एवं ये कार्त्ति
के मासि नरा व्रतपरायणाः ॥ मत्सान्निध्यगतास्तेपि प्रीतिदास्त्वं यथा मम ॥ यज्ञदानव्रततपःकारिणो मान
वाः खलु ॥ कार्त्तिकव्रतपुण्यस्य नाप्नुवंति कलामपि ॥ ॥ सूत उवाच ॥ ॥ इत्थं निशम्य भुवनाधिपतेस्तदा
नीं प्राग्जन्मपुण्यविभवे हृदि जातहर्षा ॥ विश्वेश्वरं त्रिभुवनैकनिदानभूतं कृष्णं निशम्य वचनं निजगाद स
त्या ॥ ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये सत्यभामोपाख्याने नाम द्वितीयोध्यायः ॥ ॥ सत्यभामोवाच ॥ ॥

दद्दृशे तैः सुरैस्तत्र सहस्रार्कसमद्युतिः।।उपचारैः षोडशभिः संपूज्य त्रिदशास्तदा।।दंडवत्पतिता भूमौ तानु
वाचाथ माधवः।। ।।श्रीविष्णुरुवाच।। ।।वरदोहं सुरगणा गीतवादित्रमंगलैः।।मनोभिलषितान्कामान्स
र्वमेव ददामि वः।।इषस्य शुक्लद्वादश्यां यावदुद्बोधिनी भवेत्।।मत्रात्तूर्यत्रयोघोषैर्ये गीतवादित्रमंगलान्।।
कुर्वंति नित्यं मनुजा भवद्भिर्यद्यथा कृतं।।ते मे प्रीतिकरा नित्यं मत्सांनिध्यं व्रजंति च।।पाद्यार्घ्याचमनीयाद्यै
र्यद्भवद्भिः समाहृतं।।तदक्षुत्तमपुण्यं तस्मात्तृशान्वो दुःखकारणं।।वेदाः शंखहृताः सर्वे तिष्ठंत्युदधिसंस्थिताः।।
तानानयाम्यहं देवा हत्वा सागरनंदनं।।अद्यप्रभृति वेदाश्च मंत्रबीजसमन्विताः।।प्रत्यब्दं कार्त्तिके मासि विप्र
मंत्येषु सर्वदा।।मत्स्यरूपेणमपि च भवामि सलिलमध्यगः।।भवंतोपि मया सार्द्धं मायांतु समुनीश्वराः।।का
लेस्मिन्नेव कुर्वंति प्रातःस्नानं नरोत्तमाः।।ते सर्वे यज्ञावभृथैः सुस्नातेनात्र संशयः।।ये कार्त्तिकव्रतं सम्य
क्कुर्वंति मनुजाः सदा।।ते देहांते त्वया नूनं प्राप्या मद्भवनं सदा।।विघ्नेभ्यो रक्षणं तेषां त्वया कार्यं यम त्वया।।
देया त्वया त्व वरुण पुत्रपौत्रादिसंततिः।।धनवृद्धिर्धनाध्यक्ष त्वया कार्यं ममाज्ञया।।ममरूपधरः साक्षाज्जी
वन्मुक्तोपि यं यतः।।आजन्ममरणाद्येन कृतमेतद्व्रतोत्तमं।।यथोक्तं विधिना सम्यक् स मान्यो भवतामपि।।
एकादश्यां यतश्चाहं भवद्भिः प्रतिबोधितः।।अतश्चैषा तिथिर्मोन्या सा तत्तीव प्रीतिदा मम।।व्रतद्वयं सम्यगि
दं नरैः।।

कृतंसांनिध्यकृन्मेनेतथान्यदस्ति॥ दानानितीर्थानितपांसियज्ञाःस्वर्लोकदान्येवसदास्फुरोत्तमाः॥
॥ ॥इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येतृतीयोध्यायः॥ ॥नारदउवाच॥ ॥इत्युक्त्वाभगवा
न्विष्णुःशफरीतुल्यरूपधृक्॥ स्वात्तूपपातांजलौविंध्यवासिनःकस्यपस्यच॥ सतंकमंडलौ
क्षिप्रंकूपयाक्षिप्तवान्मुनिः॥ तावत्सनममौतत्रततःकूपेन्यवेशयत्॥ तत्रापिनममौतावद्धा
सारंप्राप्तवान्मुनिः॥ एवंससागरेक्षिप्तस्तत्रसोपिविवर्द्धते॥ ततोवधीत्सतंशंखंविष्णुर्मत्स्य
स्वरूपधृक्॥ अथतंस्वकरेकृत्वाबदरीवनमागमत्॥ तत्राहूयाऋषीन्सर्वानिदमाज्ञापयद्विभुः॥
श्रीकृष्णउवाच॥ ॥अप्संतरेविशीर्णास्तुयूयंवेदान्समार्गथ॥ आनयध्वंचत्वरिताःसरहस्यान्ज
लांतरात्॥ तावत्प्रयागेतिष्ठामिदेवतागणसंयुतः॥ ॥नारदउवाच॥ ॥ततस्तैःसर्वमुनिभि
स्तपोबलसमन्वितैः॥ उद्धृतासबीजास्तेवेदायज्ञसमन्विताः॥ तैस्क्रियावान्मितंयेनलब्धंतत्त्र
न्मितस्यहि॥ ससएवऋषिर्जातस्तदाप्रभृतिपार्थिव॥ अथब्रह्मादिसंगम्यप्रयागंमुनयोयकः॥
विष्णवेसाविधात्रेतेलब्धान्वेदान्यवेदयत्॥ लब्ध्वान्वेदान्सयज्ञांश्चब्रह्माहर्षसमन्वितः॥ अ ॥४॥
अयद्वाजिमेधेनदेवर्षिगणसंमितैः॥ यज्ञांतेदेवगंधर्वयक्षपन्नगगुह्यकाः॥ निपत्यदंडवद्ब्रह्मो

विज्ञप्तिंतत्रचक्रिरे॥ ॥देवाऊचुः॥ ॥देवदेवजगन्नाथविज्ञप्तिंशृणुनःप्रभो।इष्टकालोयमस्मा
कंतस्मात्त्वंवरदोभव।स्नानेस्मिन्द्रुहिणोवेदान्नष्टान्प्रापपुनःस्वयं।यज्ञभागान्वयंप्राप्तास्त्व
त्प्रसादाद्रमापते।स्नानमेतद्दितिश्रेष्ठंब्रह्मघ्नादिविशुद्धकृत्।भुक्तिमुक्तिप्रदंचास्तुपृथिव्यांपु
ण्यवर्धनं।कालोप्ययंमहापुण्योप्रसादाद्भवतःसदा।दत्ताक्षयकरंचास्तुवरमेनंददस्वनः॥
॥श्रीविष्णुरुवाच।ममाप्येतन्मतंदेवाययद्भवद्भिरुदाहृतं।तत्तथास्तुभवत्वेतद्ब्रह्मक्षेत्रमतीप्रियं॥
सूर्यवंश्योद्भवोराजागंगामात्रानयिष्यति।सासूर्यकन्ययाचात्रकालिंद्यायोगमेष्यति।यूयंचसर्वे
ब्रह्माद्यानिवसध्वंमयासह।तीर्थराजेतिविख्यातंतीर्थमेतद्भविष्यति।दानंतपोव्रतंहोमोजपःपू
जादिकाःक्रियाः।अनंतफलदाःसंतुमत्सांनिध्यकराःसदा।ब्रह्महत्यादिपापानिसप्तजन्मार्जि
तान्यपि।दर्शनात्तस्यतीर्थस्यविनाशंयांतितत्क्षणात्।देहत्यागंतुयेधीराःकुर्वंतिममसन्नि
धौ।मत्तेनोप्रविशंत्येवनपुनर्जन्मतेनराः।पितृनुद्दिश्ययच्छ्राद्धंकुर्वंत्यत्रममाग्रतः।तेषांपितृग
णाःसर्वेयांतितेमत्सलोकतां।कालोप्येषमहापुण्यःफलदस्तुसदानृणां।सूर्येमकरगेप्रातः
स्नायिनांपापनाशनः।मकरस्थेरवौमाघेप्रातःस्नानंप्रकुर्वतां।दर्शनादेवपापानियांतिसूर्या

धथातमः॥ सलोकत्वंसमीपत्वंसारूप्यंचत्रिभिःक्रमात्॥ नृणांस्यैहंददेस्नानैर्माघेमकरके गेरवौ॥
॥५॥ यूयंमुनीश्वराःसर्वेश्रृणुध्वंवरदोस्मिवः॥ बदरीवनमध्येहंसदातिष्ठामिसर्वगः॥ अन्यत्रदशभिर्वर्षै
स्तपसाप्राप्यतेफलं॥ तत्रैतद्दिवसेकेनभवद्भिःप्राप्यतेसदा॥ स्नानस्यदर्शनंतस्ययेकुर्वंतिनरोत्त
माः॥ जीवन्मुक्ताःसदातेषुपापंनैवात्रतिष्ठति॥ सूतउवाच॥ ॥नारदउवाच॥ ॥एवंदेवान्देवदेवस्त
थोक्त्वातत्रैवांतर्धानमागात्सवेधाः॥ देवाःसर्वेप्यंशकैस्तत्रतिष्ठन्नंतर्धानंप्रापुरिंद्रादयस्ते॥ गाथामिमं
यःश्रृणुयान्नरोत्तमोयःश्रावयेद्वापिविशुद्धचेताः॥ सतीर्थराजंबदरीवनंयद्दृत्वाफलंतत्समवाप्नुयाद्ध्रु॥
॥इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येतीर्थवरप्रदानंनामचतुर्थोध्यायः॥ ॥पृथुरुवाच॥ ॥महत्फलं
त्वयाप्रोक्तंमुनेकार्त्तिकमाघयोः॥ तयोःस्नानंविधिंसम्यक्नियमानपिनारद॥ उद्यापनविधिंचैवयथा
वद्वक्तुमर्हसि॥ ॥नारदउवाच॥ ॥त्वंविष्णोरंशसंजातोनाज्ञातंविद्यतेतव॥ तथापिवदतःसम्यक्मा
हात्म्यंश्रृणुवैन्यज॥ आश्विनस्यतुमासस्ययाशुक्लैकादशीभवेत्॥ कार्त्तिकव्रतदानानितस्यांकुर्यादतं
द्रितः॥ रात्र्यांतुर्यांशशेषायामुदतिष्ठेत्सदाव्रती॥ नैर्ऋत्यांतुव्रजेद्ग्रामाद्बहिःसोदकभाजनः॥ दिवासं ॥५॥
ध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः॥ अंतर्धायतृणंभूमौशिरःप्रावृत्यवाससा॥ वक्त्रंनियम्ययत्नेन

ष्ठीवनोच्छ्वासवर्जितः ॥ कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः ॥ गृहीत्वातन्नीश्मश्रोच्छ्रायगच्छेत्तशुचि
मृत्तिकः ॥ गंधलेपक्षयकरं शौचं कुर्याद्दतंद्रितः ॥ एका लिंगे पंच गुदे त्रिर्वामे दश चोभयोः ॥ द्विःसप्तपा
दयोः पंचगृहीत्वांशौचमुच्य ॥ एतद्द्विगुणं शौचं ब्रह्मचारिवनस्थयोः ॥ यतेश्चतुर्गुणं रात्रौ तदर्धं शौचमाचरे
त् ॥ तदर्धं रुजि मार्गस्थैः स्त्रीशूद्राणां तदर्धकं ॥ शौचकर्मविहीनस्य समस्ता निष्फलाः क्रियाः ॥ मुखस्य शुद्धिवि
हीनस्य न मंत्राः फलदाः स्मृताः ॥ दंतालिप्ताविशुद्धिं च ततः कुर्यात्प्रयत्नतः ॥ आयुर्बलं यशो वर्चः प्रजापशुवसू
नि च ॥ ब्रह्मप्रज्ञां च मेधां च त्वन्नो देहि वनस्पते ॥ इति मंत्रं समुच्चार्य द्वादशांगुलकं गृह्य ॥ सामिधाक्षीरवृक्ष
स्य क्षयाहेपोषणां विना ॥ प्रतिपद्दर्शनवमी षष्ठी चार्के दिने तथा ॥ चंद्रसूर्योपरागे च न कुर्याद्दंतधावनं ॥ कं
टकीवृक्षकार्पासीनिर्गुंडीब्रह्मवृक्षकाः ॥ वटेरंडविगंधाढ्या वर्जयेद्दंतधावने ॥ ततो विष्णोः शिवस्यापि
गृहं गच्छेत्स सन्निधौ ॥ गंधपुष्पसतांबूलान्गृहीत्वा भक्तितत्परः ॥ तत्र देवस्य पाद्यादीनुपचारान्पृथ
क्पृथक् ॥ हेतास्कृत्वा पुनर्नत्वा कुर्याद्गीतादिमंगलान् ॥ तालवेणुमृदंगादिध्वनियुक्तान्सनर्तकान् ॥ त
त्रागतान्द्विजान्भक्त्या संपूज्य विधिवत्सदा ॥ भूसुरानर्चितान्दृष्ट्वा विष्णुस्तुष्यति सर्वदा ॥ पुष्पगंधैः
सतांबूलैर्गायकानपि चार्चयेत् ॥ देवालये गानपरायत्तास्ते विष्णुमूर्तयः ॥ तपांसि यज्ञदानानि कृत्वा

निचजगद्गुरोः।तुष्टिदानिकलौयस्माद्भक्त्यागानंप्रशस्यते।कस्त्वंकस्मासिदेवेशमयापृष्टस्त्वंपार्थिव।विष्णुरे
॥६॥ वंतदाश्रहंमद्भक्तिपरितोषितः।नाहंवसामिवैकुंठेयोगिनांहृदयेरवौ।मद्भक्तायत्रगायंतितत्रतिष्ठामिना
रद।तेषांपूजादिकंगंधपुष्पादिक्रियतेयदि।तेनप्रीतिंपरांयामितथामत्प्रपूजनात्।मत्पुराणकथांश्रु
त्वामद्भक्तानांचगायनं।तेछयंतिनराःमूढास्तेमेद्वेष्याभवंतिहि।शिरीषोन्मत्तगिजामाल्लिकाश्चाल्मलीभ
वैः।केतकीभवपुष्पैश्चनैवार्च्यःशंकरस्तथा।गणेशंतुलसीपत्रैर्दुर्गांनैवतुदूर्वया।मुनिपुष्पैस्तथासूर्यं
लक्ष्मीकामोनचार्चयेत्।येप्योनान्यानिप्रशस्तानिपूजायांसर्वदेवतु।एवंपूजाविधिंकृत्वादेवदेवंक्षमापये
त्।मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर।यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे।ततःप्रदक्षिणांकृत्वादं
डवत्प्रणिपत्यच।पुनःक्षमाप्यदेवेशंगायनादिसमापयेत्।विष्णोःशिवस्यापिचपूजनंयेकुर्वंतिकुर्वंति
कुर्वंतिसम्यकुनिशिकार्त्तिकस्य।विधूतपाप्माःसहपूर्वजैस्तेप्रयांतिविष्णोर्भुवनंमनुष्याः।।इतिश्रीपद्म
पुराणेकार्त्तिकमाहात्म्येशौचादिविधिकथनंनामपंचमोध्यायः।।नारदउवाच।।नाडिद्वयविशिष्टा
यांरात्रौगछेज्जलाशये।तिलदर्भाक्षतापुष्पगंधाद्यैःसहितःशुचिः।मानुष्येदेवखातेचनद्यामथवा ॥६॥
संगमे।क्रमाद्दशगुणंस्नानंतीर्थेनंतफलंस्मृतं।विष्णुंस्मृत्वाततःकुर्यात्संकल्पंसवनस्यतु।तीर्थादिदेवता

ण्यश्च क्रमादर्घ्याणि पादयेत्। नमः कमलनाभाय नमस्ते जलशायिने। नमस्तेस्तु हृषीकेश गृहाणार्घ्यं न
मोस्तु ते। वैकुंठे च प्रयागे च तथा बदरिकाश्रमे। यतो विचक्रमे त्रेधा विष्णुर्वै निदधे पदं। अतो देवा अवं
तु नो यतो विष्णुर्विचक्रमे। तैरेव सहितैः सर्वैर्मुनिर्वेदमुखान्वितैः। कार्त्तिकेहं करिष्यामि प्रातःस्नानं जना
र्दन। प्रीत्यर्थं तव देवेश दामोदर मया सह। व्रतिनः कार्त्तिके मासि स्नातस्य विधिवन्मम। अर्घ्यं गृहाण भक्त्ये
श राधया नमोस्तु ते। नित्ये नैमित्तिके काम्ये कार्त्तिके पापनाशिनी। गृहाणार्घ्यं मया दत्तं दनुजेंद्रनिषूद
न। स्मृत्वा भागीरथीं विष्णुं शिवं सूर्यं जले विशेत्। नाभिमात्रे जले तिष्ठन् व्रती स्नायाद्यथाविधि। तिलामलक
चूर्णेन गृही स्नानं समाचरेत्। विधवा स्त्री यतीनां च तुलसीमूलमृत्तिका। सप्तमीं दर्शनवमीं द्वितीयां दश
मीं शुचि। त्रयोदशीं च न स्नायाद्धात्रीफलतिलैः सह। आदौ कुर्यान्मंगलस्नानं मंत्रस्नानं ततः परं। स्त्रीशूद्रा
णां न वेदोक्तैः मंत्रैस्तेषां पुराणजैः। त्रिधा भूद्देवकार्यार्थं यः पुरा भक्तभावनः। स विष्णुः सर्वपापघ्नः पुनातु
कृपया हि मां। विष्णोराज्ञामनुप्राप्य कार्त्तिकव्रतकारकं। रक्षंतु देवास्ते सर्वे मां पुनातु सवासवाः। वेदमंत्राः
सबीजास्ते सरहस्या मखान्विताः। कश्यपाद्याश्च मुनयो मां पुनातु सदैव ते। गंगाद्याः सरितः सर्वाः तीर्थानि
जलदा नदाः। समस्ताः सागराः सर्वे मां पुनंतु जलाशयाः। पतिव्रतास्त्वदित्याद्या यक्षाः सिद्धाश्च पन्नगाः।

ओषध्यपर्वताश्चापिमांपुनंतुत्रिलोकजाः।।एभिःस्नात्वाव्रतीमंत्रैर्हस्तन्यस्तपवित्रकः।।देवर्षिमानवपितॄन्
 स्तर्पयेच्चयथाविधि।।यावंतःकार्त्तिकेमासिवर्त्ततेपितृतर्पणे।।तिलास्तत्संख्यकाब्दानिपितरःस्वर्गवासि
नः।।ततोजलाद्विनिष्क्रम्यशुचिवस्त्रावृतोव्रती।।प्रातःकालोदितंकर्मसमाप्यार्च्चयेद्धरिंपुनः।।तीर्थादिदेवान्सं
स्मृत्यपुनरर्घ्यान्प्रदापयेत्।।गंधपुष्पफलैर्युक्तान्भक्त्यात्वरमानसः।।ततश्चब्राह्मणान्भक्त्यापूजयेद्वे
दपारगान्।।धूपैःपुष्पैःसतांबूलैःप्रणमेच्चपुनःपुनः।।तीर्थानिदक्षिणेपादेवेदास्तन्मुखमाश्रिताः।।सर्वां
गेष्वाश्रितादेवाःपूजितास्तेसदर्चकैः।।अव्यक्तरूपिणोविष्णोःस्वरूपंब्राह्मणाभुवि।।नावमान्याविरोध्या
श्चकदाचिच्छुभमिच्छता।।ततोहरिप्रियांदेवींतुलसीमर्चयेद्व्रती।।प्रदक्षिणानमस्कारान्कुर्यादेकाग्रमान
सः।।देवैस्त्वंनिर्मितापूर्वमर्चितासिमुनीश्वरैः।।नमोनमस्तेतुलसिपापंहरहरिप्रिये।।ततोविष्णुकथांश्रु
त्वापौराणींस्थिरमानसः।।ब्राह्मणंतंमुनिंविप्रंपूजयेद्भक्तिमान्व्रती।।एवंविधिंसम्यक्पूर्वोक्तंभक्तिमान् सर्व
रः।।यःकरोतिसवैलेभेनारायणसलोकतां।।रोगापहंपातकनाशकृत्परंसद्बुद्धिदंपुत्रधनादिसाध
कं।।मुक्तेर्निदानंनहिकार्त्तिकव्रताद्विष्णुप्रियादन्यदिहास्तिभूतले।। ।।इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येपूजावि ।।७।।
धिकथनोनामषष्ठोध्यायः।। ।।नारदउवाच।। ।।कार्त्तिकव्रतिनांपुंसांनियमायेप्रकीर्तिताः।।तान्स्शृणुष्वमयारा

जन्मकथ्यमासन्नसमासतः ॥ सर्वामिषाणिमांसंचक्षौद्रंसौवीरकंतथा ॥ राजिकामाजिकंचैवनैवाद्यात्कार्त्तिकव्रती ॥
द्विदलंतिलतैलंचतथान्नंशाल्मदूषकं ॥ भावदुष्टंक्रियादुष्टंवर्जयेत्कार्त्तिकव्रती ॥ परान्नंचपरद्रोहंपरदेशगमंतथा ॥
तीर्थेप्रतिग्रहंचैववर्जयेत्कार्त्तिकव्रती ॥ देवदेवद्विजानांचगुरूणांव्रतीनांतथा ॥ स्त्रीराजमहतांनिंदांवर्जयेत्कार्त्ति
कव्रती ॥ प्राण्यंगामिषंचूर्णंफलेजंबीरमामिषं ॥ धान्येमसूरिकाप्रोक्ताअन्नंपर्युषितंतथा ॥ गोछागीमहिषी
भूतादन्यदुग्धादिचामिषं ॥ द्विजक्रीताःरसाःसर्वेलवणंभूमिजंतथा ॥ ताम्रपात्रस्थितंगव्यंजलपल्वलसंस्थि
तं ॥ आत्मार्थपाचितंचान्नंआमिषंतंबुधैःस्मृतं ॥ ब्रह्मचर्यमधःशायिपत्रावल्यांचभोजनं ॥ चतुर्थकालेभुंजीत
कुर्यादेवंसदाव्रती ॥ नरकस्यचतुर्दश्यांतैलाभ्यंगंतुकारयेत् ॥ अन्यत्रकार्त्तिकस्नायीतैलाभ्यंगंविवर्जयेत् ॥ प
लांडुंलशुनंगृंजंछात्राकंगंजरंतथा ॥ नालिकामूलकंशिग्रुंचवर्जयेत्कार्त्तिकव्रती ॥ अलाबुंचापिवृंताकंकूष्मांडं
बृहतीफलं ॥ श्लेष्मातकंकपित्थंचवर्जयेद्वैष्णवव्रती ॥ रजस्वलांत्यजम्लेछपतितव्रात्यकैस्तथा ॥ द्विजद्विट्वेद
बाह्यैश्चनवदेत्सर्वदाव्रती ॥ एभिर्दृष्टंचकाकैश्चसूतकान्नंयथाभवेत् ॥ द्विःपाचितंचदग्धान्नंनैवाद्याद्वैष्णवव्रती ॥
एतानिवर्जयेन्नित्यंव्रतीसर्वव्रतेष्वपि ॥ वृ धाद्यंचप्रकुर्वीतस्वशक्त्याविष्णुतुष्टये ॥ क्रमात्तुकूष्मांडबृहतीतरुणी
मूलकंतथा ॥ श्रीफलंचकालिंगंचफलंधात्रीभवंतथा ॥ नारिकेलमलाबुंचपटोलंबेटकीफलं ॥ चर्मवृंताकं

॥८॥ बालंन्नाकंकुलत्थसिजंतथा॥न्नाकान्येतानिवर्ज्यानिक्रमप्राप्तिपदादिषु॥धात्रीफलंरवौतद्वद्वर्जयेत्सर्वदाव्रती॥ए
भ्योन्यद्वर्जयेत्किंचिद्यद्विष्णुप्रीतयेनरैः॥तत्पुनर्ब्राह्मणेदत्त्वाभक्षयेत्सर्वदैवहि॥एवमेवहिमायेत्तुकुर्याच्चनियमा
न्व्रती॥हरिजागरणंतत्रपूर्वोक्तंचनकारयेत्॥यथोक्तकारिणंदृष्ट्वाकार्त्तिकव्रतिनंनरं॥यमदूताःपलायंतेगजाः
सिंहार्दितायथा॥वरंविष्णुव्रतंह्येतन्नयज्ञशतयाजकः॥यत्कृत्वाप्नुयात्स्वर्गंवैकुंठंकार्त्तिकव्रती॥भुक्तिमुक्तिप
दानीहयानिक्षेत्राणिभूतले॥वसंतितानितद्देहेकार्त्तिकव्रतकारिणः॥दुःस्वप्नंदुष्कृतंकिंचिन्मनोवाक्कायजंतथा॥ प्र
कार्त्तिकव्रतिनंदृष्ट्वाविलयंयांतितत्क्षणात्॥कार्त्तिकव्रतिनःपुंसोविष्णोर्वाक्यप्रणोदिताः॥रक्षांकुर्वंतिशक्रा
द्याःसुरानंकिंकरायथा॥विष्णुव्रतकरोनित्यंयत्रतिष्ठतिपूजितः॥ग्रहभूतपिशाचाद्यानैवतिष्ठंतितत्रवै॥का
र्त्तिकव्रतिनःपुण्यंयथोक्तव्रतकारिणः॥नसमर्थोभवेद्वक्तुंब्रह्मापिहिचतुर्मुखः॥विष्णुप्रियंसकलकल्मषना
शनंचसत्पुत्रपौत्रधनधान्यविवृद्धिकारी॥ऊर्जव्रतंसनियमंकुरुतेमनुष्यःकिंतस्यतीर्थपरिशीलनसेवया
च॥ ॥इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येनियमकथनंनामसप्तमोध्यायः॥ ॥नारदउवाच॥ ॥अथोर्ज
व्रतिनःसम्यगुद्यापनविधिंनृप॥तच्छृणुष्वमयाख्यातंसविधानंसमासतः॥ऊर्जशुक्लचतुर्दश्यांकुर्यादुद्याप ॥८॥
नंव्रतीव्रतसंपूर्णतार्थायविष्णुप्रीत्यर्थमेवच॥तुलस्याउपरिष्टात्तुकुर्यान्मंडपिकांशुभां॥सतोरणांचतुर्द्वारांपु

ष्वचामरश्चोभितां। द्वारेषुद्वारपालांश्चपूजयेन्नमयापृथक्। पुष्पदन्तीलंस्फन्तीलंचजयंविजयमेवच। तुलसी
मूलदेशेचसर्वतोभद्रमेवच। चतुर्भिर्वर्णकैःसम्यक्शोभाढ्यंसमलंकृतं। तस्योपरिष्टात्कलशंपंचरत्नस
मन्वितं। महाफलेनसंयुक्तंकुंभंतत्रनिधायच। पूजयेत्तत्रदेवेशंशंखचक्रगदाधरं। कौशेयपीतवसनं
फलैर्जलधिकन्यया। इंद्रादिलोकपालांश्चमंडलेपूजयेद्बली। द्वादश्यांप्रतिबुद्धोसौत्रयोदश्यांचयःस्करैः।
दृष्टोर्चितश्चतुर्दश्यांतस्मात्पूज्यास्तथात्विह। तस्यामुपवसेद्भक्त्याश्रांतःप्रयतमानसः। पूजयेद्देवदेवेशंसो
वर्णभूर्वनुज्ञया। उपचारैःषोडशभिर्नानाभक्ष्यसमन्वितैः। रात्रौजागरणंकुर्याद्गीतवादित्रमंगलैः। गीतंकु
र्वंतियेभक्त्याजागरेचक्रपाणिनः। जन्मांतरशतोद्भूतैस्तेमुक्ताःपापसंचयैः। नराणांजागरेविष्णोःशक्त्यानृत्यं
प्रकुर्वतां। गोसहस्रंचददतांसमंफलमुदाहृतं। गीतनृत्यादिकंकुर्याद्दर्शयेन्कौतुकानिच। पुरतोवासुदेवस्य
रात्रौयोहरिजागरे। पठन्विष्णुपुराणानियोरंजयतिवैष्णवान्। सुखेनकुरुतेवाद्यंस्वैछालापांश्चदर्शयेत्।
भावैरेतैर्नरोयस्तुकुरुतेहरिजागरं। दिनेदिनेतस्यफलंतीर्थकोटिगुणंस्मृतं। ततस्तुपूर्णिमायांचसपत्नी
कोद्विजोत्तमान्। त्रिंशन्मितांस्तथैकंवास्ववृत्त्यावान्निमंत्रयेत्। वरदश्चायतोविष्णुर्मत्स्यरूपीभवत्तदा।
अस्यांदत्तंकृतंजप्तंतदक्षय्यफलंस्मृतं। अतस्तांभोजयेद्विप्रान्पायसान्नादिनाव्रती। अतोदेवद्रुतिद्वाभ्यां
कुर्यात्तिलपायसं। प्रीत्यर्थंदेवदेवेशस्यदेवानांचपृथक्पृथक्। दक्षिणांचयथाशक्त्याप्रदद्याक्षणमेच्छोन्।

पुनर्देवं समभ्यर्च्य तांश्च विप्रान्क्षमापयेत् ॥ ततो गां कपिलां तत्र पूजयेद्विधिवद्व्रती ॥ गुरुं व्रतोपदेष्टारं
॥२॥ वस्त्रालंकारणादिभिः ॥ सपत्नीकं समभ्यर्च्य तांश्च विप्रान्क्षमापयेत् ॥ युष्मत्प्रसादाद्देवेन्द्रः प्रसन्नोस्तु स
दा मम ॥ व्रतादस्माच्च यत्पापं सप्तजन्मकृतं मया ॥ तत्सर्वं नाशमायातु स्थिरा मे चास्तु संततिः ॥ मनोरथाश्च
सफलाः संतु नित्यं मम मार्चितान् ॥ देहांते वैष्णवं स्थानं प्राप्नुयामतिदुर्लभं ॥ इति क्षमाप्य तान् विप्रान् प्रसा
द्य च विसर्जयेत् ॥ तामर्चां गुरवे दद्याद्यथा यत्कृतं तथा व्रती ॥ ततः सुहृद्गुरुयुतः स्वयं भुंजीत वाग्यतः ॥ कार्त्ति
के चाथ तपसि विधिरेवंविधः स्मृतः ॥ एवं यः कुरुते सम्यक्कार्त्तिकस्य व्रतं नरः ॥ विपापास्सर्वकामाढ्यो
विष्णुसान्निध्यगो भवेत् ॥ सर्वव्रतैः सर्वतीर्थैः सर्वदानैश्च यत्फलं ॥ तत्कोटिगुणितं ज्ञेयं सम्यगस्य विधा
नतः ॥ ते धन्यास्ते महापुण्यास्तेषां च सफलो भवः ॥ विष्णुभक्ता गता ये स्युः कार्त्तिकव्रतकारिणः ॥ देहस्थि
तानि पापानि विलोकयांति तद्भयात् ॥ क्व यास्यामो भवत्येष यदूर्जव्रतकृन्नरः ॥ इत्यूर्जव्रतनियमान्स्वर्णो
ति भक्त्या यो वैष्णवः कथयति साधकवैष्णवाग्रे ॥ तौ सम्यग्व्रतकरणात्फलं भवेद्यत्तत्सर्वं कलुषविनाशनं
लभेते ॥ ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये अष्टमोऽध्यायः ॥ ॥ पृथुरुवाच ॥ ॥ यत्त्वया कथि ॥९॥
तं ब्रह्मन्व्रतमूर्जस्य विस्तरात् ॥ तत्र यातुलसीमूले विष्णोः पूजा त्वयोदिता ॥ तेनाहं प्रष्टुमिच्छामि माहात्म्यं तु
लसीभवं ॥ कथं सा प्रीतिदा तस्य देवदेवस्य शार्ङ्गिणः ॥ कथमेषा समुत्पन्ना कस्मिन्स्थाने च नारद ॥ एतद्ब्रूहि स

मासेनसर्वज्ञोपिमत्तोमम। ॥नारदउवाच। ॥शृणुराजन्नवहितोमाहात्म्यंतुलसीभवं। सेतिहासंपुरावृत्तं
तत्सर्वंकथयामिते। पुराशक्रःशिवंद्रष्टुमगात्कैलासमंदिरं। सर्वदेवैःपरिवृतस्त्वप्सरोगणसेवितः। पा
वद्गतःशिवपुरंतावत्तत्रसदृष्टवान्। पुरुषंभीमकर्माणंदृष्ट्वानयनभीषणं। सपृष्टस्तेनकस्त्वंभोक्वगतोज
गदीश्वरः। एवंपुनःपुनःपृष्टस्तदानैवोचवाङ्नृप। ततःक्रुद्धोवज्रपाणिस्तंनिर्भर्त्स्यवचोब्रवीत्। ॥इंद्रउ
वाच। ॥रेमयापृच्छमानोपिनोत्तरंदत्तवानसि। अतस्त्वांहन्मिवज्रेणकस्तेत्राताऽसिदुर्मते। ॥नारदउवाच॥
इत्युदार्यततोवज्रीवज्रेणाभिहनद्दृढं। तेनास्यकंठोनीलत्वमगाद्वज्रंचभस्मतां। ततोरुद्रःप्रजज्वालतेजसा
प्रज्वलन्निव। दृष्ट्वाबृहस्पतिस्तूर्णंकृतांजलिपुरोभवत्। इंद्रंचदंडवद्भूमौकृत्वास्तोत्रंप्रचक्रमे। ॥बृह
स्पतिरुवाच। ॥नमोदेवाधिदेवायत्र्यंबकायकपर्दिने। त्रिपुरघ्नायशर्वायनमोंधकनिषूदने। विरू
पायातिरूपायबहुरूपायशंभवे। यज्ञविध्वंसकर्त्रेचयज्ञानांफलदायिने। कालांतकायकालायकाल
भोगिधरायच। नमोब्रह्मशिरोहंत्रेब्रह्मण्यायनमोनमः। ॥नारदउवाच। ॥एवंस्तुतस्तदाशंभुर्धि
षणेनजगादह। संहरन्नयनज्वालांत्रिलोकीदहनक्षमां। वरंवरयभोब्रह्मन्प्रीतःस्तुत्यानयातव। इंद्रस्य
जीवदानेनजीवेतित्वंप्रथांव्रज। ॥बृहस्पतिरुवाच। ॥यदितुष्टोसिदेवेशत्वंपाहींद्रंशरणागतं। अग्निरेषस

मयात्तुभालनेत्रसमुद्भवः॥ ॥ईश्वरउवाच॥ ॥पुनःप्रवेशयामासत्तीभालनेत्रेकपर्दिनी॥ एनं सक्षामहेद्रूरंय
॥१०॥ थेंद्रंनैवपीड्येत॥ ॥नारदउवाच॥ ॥इत्युक्तात्तंकरेधृत्वाप्राक्षिपल्लवणांभसि॥ सोपतत्सिंधुसंगायाःसा
गरस्यचसंगमे॥ तावत्सबालरूपत्वमगात्संप्ररुरोदह॥ रुदतस्तस्यनादेनचकंपेधरणीमुहुः॥ स्वर्गश्चस
त्यलोकश्चतत्स्वनाद्बधिरीकृतः॥ श्रुत्वाब्रह्माययौतत्रकिमेतदितिविस्मितः॥ तावत्समुद्रस्योत्संगेतंबा
लंसददृशेहि॥ ततोब्रह्माब्रवीद्वाक्यंकस्यायंशिशुरद्भुतः॥ निशम्येतिवचोधातुर्वाक्यंसिंधुरथाब्रवीत्॥ दृ
ष्ट्वाब्रह्मणमायांतंसमुद्रोपिकृतांजलिः॥ प्रणम्यानीरसाबालंतस्योत्संगेन्यवेशयत्॥ भोब्रह्मन्सिंधु
गंगायांजातोयंममपुत्रकः॥ जातकर्मादिसंस्कारान्कुरुष्वास्यजगद्गुरो॥ ॥नारदउवाच॥ ॥इत्युक्ते
दत्तिपाणोधोसबालःसागरात्मजः॥ ब्रह्माणमथहस्तेकूर्चेविधून्वंतंमुहुर्मुहुः॥ धून्वतस्तस्यकूर्चंतुनेत्रा
भ्यामगमज्जलं॥ कथंचिन्मुक्तकूर्चस्तुब्रह्माप्रोवाचसागरं॥ ॥ब्रह्मोवाच॥ ॥नेत्राभ्यांविधृतंयस्मादने
नेतज्जलंमम॥ तस्माज्जलंधरइतिख्यातोनाम्नाभवत्वसौ॥ अधुनैवैषतरुणःसर्वशास्त्रास्त्रपारगः॥
अवध्यःसर्वभूतानांविनारुद्रंभविष्यति॥ अतएवसमुद्भूतस्तत्रैवत्वंगमिष्यति॥ ॥नारदउवाच॥ ॥ ॥१०॥
इत्युक्त्वाशुक्रमाहूयराज्येतंवाभिषेचयत्॥ आमंत्र्यसरितांनाथंब्रह्मांतर्धानमागमत्॥ अथतद्दर्शनोत्सु

ह्रनयनः सागरस्तथा ॥ कालनेमीस्फत्तांद्रंदांत्तद्ग्रार्यार्थमयाचत ॥ तेकालनेमिप्रमुखास्तत्तोस्फरास्तस्मै
स्फत्तांत्तांप्रददुः प्रहर्षित्ताः ॥ सचापित्तांप्राप्यस्फहृद्वरांबलीग्राग्रासगांस्फुक्सहायवान्चत्री ॥ ॥ इति
श्रीपद्मपुराणेकार्त्तिकमाहात्म्येजलंधरोपाख्यानेनवमोध्यायः ॥ ॥ नारदउवाच ॥ ॥ येदेवैर्नि
र्जिताः पूर्वंदैत्याः पातालसंस्थित्ताः ॥ तेपिभूमंडलंयात्तानिर्भयास्तमुपाश्रित्ताः ॥ कदाचिच्छिन्नशीर
संदृष्ट्वाराहुंसदैत्यराट् ॥ प्रप्रच्छमार्गवंतस्याभूरश्च्छिदकारणं ॥ ज्ञाग्रासससमुद्रस्यमंथनंदेवका
रितं ॥ रत्नापहरणंचैवदैत्यानांचपराभवं ॥ सश्रुत्वाक्रोधरक्ताक्षः स्वपितुर्मंथनंतदा ॥ दूतंसंप्रेषयामा
सघस्मरंशक्रसान्निधौ ॥ दूतस्त्रिविष्टपंगत्वासुधर्मांप्रापसत्वरं ॥ गत्वोदखर्वमौलिस्तदेवेंद्रंवाक्यम
ब्रवीत् ॥ ॥ घस्मरउवाच ॥ ॥ जलंधरोब्धितनयः सर्वदैत्यजनेश्वरः ॥ दूतोहंप्रेषितस्तेनसयदाहस्रृणु
धतत्त् ॥ कस्माद्वयाममपिताम्मथितः सागरोद्रिणा ॥ नीतानिसर्वरत्नानित्तानिशीघ्रंप्रयच्छनः ॥ इति
दूत्तवचः श्रुत्वाविस्मितस्त्रिदशाधिपः ॥ उवाचघस्मरंक्रुद्धंभयरोषसमन्वितः ॥ ॥ इंद्रउवाच ॥ ॥ श्रृणु
दूतमयापूर्वंमथितः सागरोयथा ॥ अद्रयोस्मद्भया [illegible] त्रस्तास्वकुक्षिस्थाकृता [illegible]पा ॥ अन्येपिमद्भ
यात्तेनरक्षितादितिजास्तथा ॥ तस्मात्तेद्रत्नजातंवमयाप्यपहृत्तंकिल ॥ पुरांखोप्येवंपुरादेवान्विद्विष

न्सागरात्मजः॥ ममानुज्ञेन संत्रस्तः प्रविष्टः सागरोदरं। तदर्थं मंथनं चक्रे तस्याहमवलोकितुं। तद्गच्छ क
 थयस्वास्य सर्वं कथनकारणं॥ ॥नारद उवाच॥ ॥इत्युक्त्वा विसर्जितो दूतस्त्रिदिवेंद्रेणागमद्ध्रुवं। तदिंद्रवचनं
सर्वं दैत्यायाकथयत्तदा। तन्निशम्य तदा दैत्यो रोषस्फुरिताधरः॥ उद्योगमकरोत्तूर्णं सर्वदेवजिगीषया॥ त
दाज्ञयासुरेंद्रस्य दिग्भ्यः पातालतस्तदा। दितिजाः प्रत्यपद्यंत कोटिशः कोटिशस्तदा॥ अथ शुंभनिशुंभाद्यैर्ब
लाधिपतिकोटिभिः॥ महात्रिविष्टपं दैत्यो यत्रासौ पाकशासनः। पुरीमावृत्य तिष्ठंतं दृष्ट्वा दैत्यबलं महत्॥
निर्ययुस्त्वमरावत्या देवाः क्रुद्धाय दंशिताः॥ ततः समभवद्युद्धं देवदानवसेनयोः॥ मुसलैः परिघैर्बाणैर्गदा
शक्तिपरश्वधैः॥ तेऽन्योन्यं समधावंत निघ्नंतश्च परस्परं। मुहूर्तेनाभवत्सेना रुधिरौघप्रवर्षिणी॥ प
तितैः पात्यमानैश्च गजाश्वरथपत्तिभिः॥ व्यराजत रणे भूमिः संध्याभ्रपटलैरिव। तत्र युद्धे मृतान्दैत्या
न्भार्गवस्तूदतिष्ठयत्। विद्यया मृतजीविन्यासिंचतास्तोयबिंदुभिः॥ देवानपि हतान्युद्धे तत्र जीवयदं
गिराः॥ दिव्यौषधीः समानीय द्रोणाद्रेः स पुनः पुनः॥ दृष्ट्वा देवान्हतान्युद्धे पुनरेव समुत्थितान्॥ जालं 
धरः क्रोधवशगो भार्गवं वाक्यमब्रवीत्॥ ॥जालंधर उवाच॥ ॥मया युद्धे हता देवा उत्तिष्ठंति कथं पुनः॥
तेव संजीवनी विद्या नैवान्यत्रेति नः श्रुतं॥ ॥शुक्र उवाच॥ ॥दिव्यौषधीः समानीय द्रोणाद्रेरंगिराः सुरान्॥

जीवत्येवातिशीघ्रं द्रोणाद्रिंत्वमुपाहर ॥ ॥नारद उवाच ॥ ॥इत्युक्तः स तु दैत्योऽसौ द्रोणीत्वाद्द्रोणाचलं तदा ॥ प्राक्षि
प्त्सागरे तूर्णं पुनरागान्महाहवं ॥ अथ देवान्हतान्दृष्ट्वा द्रोणाद्रिममदद्गुरुः ॥ तावत्तत्र गिरिं स्थाने न ददर्श स
शर्वित्तः ॥ ज्ञात्वा दैत्यहृतं द्रोणं धिषणो भयविह्वलः ॥ आगत्य दूराद्व्याजह्रे देवान्साकुलितलोचनः ॥ पलायध्व
महादेवा नाहि जेतुं समायसः ॥ रुद्रांशसंभवो ह्येष स्मरच्चंद्राकचेष्टितं ॥ श्रुत्वा तद्वचनं देवा भयविह्वलितास्तदा ॥
दैत्येंद्रैर्वध्यमानाश्च पलायंति दिशो दश ॥ देवान्विद्रावितान्दृष्ट्वा दैत्यः सागरनंदनः ॥ शंखभेरीजयरवैः प्रावि
वेशामरावतीं ॥ प्रविष्टे नगरीं दैत्ये देवाः शक्रपुरोगमाः ॥ सुवर्णाद्रिगुहां प्राप्ता न्यवसन्दैत्यतापिताः ॥ तत
स्तु सर्वेषु सुराधिकारेष्विंद्रादिकानां विनिवेश्य स तदा ॥ शुंभादिकान्दैत्यवरान्पृथक्पृथक्स्वयं सुवर्णाद्रिगुहा
मगान्नृपः ॥ ॥इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये दशमोध्यायः ॥ ॥नारद उवाच ॥ ॥पुनर्दैत्यं समायांतं
दृष्ट्वा देवाः सवासवाः ॥ भयप्रकंपिताः सर्वे विष्णुं स्तोतुं प्रचक्रमुः ॥ ॥देवा ऊचुः ॥ ॥नमो मत्स्यकूर्मादिनाना
स्वरूपैः सदा भक्तकार्योद्यतायार्त्तिहंत्रे ॥ विधात्रादिसर्गस्थितिध्वंसकर्त्रे भुजंगारियानाय पीतांबराय ॥ मखा
दिक्रियाकर्त्रे गदाशंखपद्मारिहस्ताय तेस्तु ॥ रमावल्लभायासुराणां निहंत्रे ×पाककर्त्रे विकर्त्रे शरण्याय तस्मै
नतास्मो नतास्मः ॥ नमो दैत्यसंतापितामर्त्यदुःखाचलध्वंसदंभोलये विष्णवे ते ॥ भुजंगेशतल्पेशयायार्क

चंद्रार्द्धिनेत्रायसस्मैनतास्मोनतास्मः॥ ॥नारद उवाच॥ ॥संकष्टनाशनंनामस्तोत्रमेतत्पठेन्नरः॥ सकदाचिन्नसंक
॥१२॥ ष्टैःपीड्यतेकृपयाहरेः॥ इतिदेवास्तुतिंयावत्कुर्वंतिदनुजेद्विषः॥ तावत्स्वशरणामापन्निर्विज्ञातोविष्णुनातदा॥
सहसोत्थायदैत्यारिःकृपयाविह्वलमानसः॥ आरुह्यगरुडंवेगाल्लक्ष्मीवचनमब्रवीत्॥ ॥श्रीभगवानुवाच॥
॥ ॥जलंधरेणतेभ्रात्रादेवानांकदनंकृतं॥ तेनाहूतोगमिष्यामियुद्धायत्वरयान्वितः॥ ॥लक्ष्मीरुवाच॥ ॥
अहंतेवल्लभाजाताभक्त्याचेयदिसर्वदा॥ तदाकथंतेममभ्रातायुद्धेवध्यःकथंप्रभो॥ ॥श्रीभगवानुवाच॥॥
रुद्रांशसंभवत्वाच्चब्रह्मणोवचनादपि॥ प्रीत्याचतववनैवायंममवध्योजलंधरः॥ ॥नारद उवाच॥ ॥इत्यु
क्त्वागरुडारूढःशंखचक्रगदासिभृत्॥ विष्णुस्तत्रययौयुद्धंयत्रदेवाःस्थिताःस्थले॥ तथारुणानुजेनैवपक्षवातप्रपी
ड़िताः॥ वात्याविवर्त्तिदैत्याबभ्रमुःखेयथाघनाः॥ ततोजलंधरोदैत्यान्दृष्ट्वावातप्रपीडितान्॥ उद्वृत्तनयनः
क्रोधात्ततोविष्णुंसमभ्ययात्॥ ततःसमभवद्युद्धंविष्णुदैत्येंद्रयोर्महत्॥ आकाशंकुर्वतोबाणैक्षिप्तैदानिरवका
शवत्॥ विष्णुर्दैत्यास्त्रयोबाणौघौघध्वजंचिच्छेतथाहसन्॥ चिच्छेदतंचहृदयेबाणेनैकेनताडयत्॥ ततोदैत्यासमु
त्पत्यगदापाणिस्त्वरान्वितः॥ आहत्यगरुडंमूर्ध्निपातयामासभूतले॥ ॥विष्णुर्गदांखड्गेनाचिच्छेदप्रहसन्निव॥ ॥१२॥
तावत्सहृदयेविष्णुंजघानदृढमुष्टिना॥ ततोबाहुयुद्धेनयुयुधातेमहाबलौ॥ बाहुभिर्मुष्टिभिश्चैवजानुभिर्ना

दयन्महीं ॥ एवंतौसुचिरंद्वंद्वंकृत्वा [illegible] विष्णुःप्रतापवान् ॥ उवाचदैत्यराजानंमेघगंभीरनिःस्वनः ॥
॥ श्रीहरिरुवाच ॥ ॥ वरंवरयदैत्येंद्रप्रीतोस्मितवविक्रमात् ॥ अदेयमपिदास्यामियत्तेमनसिवर्तते ॥
जलंधरउवाच ॥ ॥ यदिभावुकतुष्टोसिवरमेकंददस्वमे ॥ मद्भगिन्यासहत्वंयामद्गृहेसदावस ॥ ॥ ना
रदउवाच ॥ ॥ तथेत्युक्तासभगवान्सर्वदेवगणैःसह ॥ जालंधरंनामपुरमगमद्भार्ययासह ॥ जलं
धरस्तुदेवानामधिकारेषुदानवान् ॥ स्थापयित्वासहर्षःसन्पुनरागान्महीतलं ॥ देवगंधर्वसिद्धेषुयत्कि
चिद्रत्नसंचयं ॥ तदात्मवशगंकृत्वातिष्ठत्सागरनंदनः ॥ पातालभुवनेदैत्यंनिशुंभंसमहाबलं ॥ स्थापयित्वा
सशेषादीन्नद्रूत्तलंबली ॥ देवगंधर्वसिद्धौघान्यक्षराक्षसपन्नगान् ॥ स्वपुरेनागरान्कृत्वाशशासभुव
नत्रयं ॥ एवंजलंधरःकृत्वास्ववशेवात्रवर्तिनः ॥ धर्मेणपालयामासप्रजाःपुत्रानिवौरसान् ॥ नकश्चिद्व्याधि
तोनैवदुःखितोनकृशस्तथा ॥ नदीनोदृश्यतेतस्मिन्धर्मराज्येप्रशासति ॥ ॥ नारदउवाच ॥ ॥ एवंमहींप्रशास
तिदानवेंद्रेधर्मेणसम्यकुयदृच्छयाहं ॥ कदाचिदागामथतस्यलक्ष्मींविलोकितुंत्वच्चरणंचसेवितुं ॥ ॥ इति
श्रीपद्मपुराणेकार्तिकमाहात्म्येएकादशोध्यायः ॥ ॥ नारदउवाच ॥ समांसंपूज्यविधिनादानवेंद्रोतिभक्तितः ॥
संप्रहस्यतदावाक्यंजगादमुनिसत्तमं ॥ ॥ जालंधरउवाच ॥ ॥ कुतआगम्यतेब्रह्मन्किंचिदृष्टंत्वयाक
चित् ॥ यदर्थमिहवायातस्तदाज्ञापयमांमुने ॥ ॥ नारदउवाच ॥ ॥ गतःकैलासभुवनंद्रष्टुंयोगेहंयदृच्छया ॥

कार्त्ति०

॥१२॥ तत्रोमयासमासीनंदृष्टवानस्मिशंकरं।योजनायामविस्तीर्णःकल्पवृक्षोमहामुने।।कामधेनुकुलाकीर्णश्चिंतामणिसु
दीपिते।तंदृष्ट्वामहदाश्चर्यंवितर्कोभिभवत्तदा।कापीदृशीभवेदृद्धिस्त्रिलोक्यांवानवेत्तिच।तावत्तदापिदृष्टेंद्रसमृद्धिः
सम्भुक्तामया।नेंद्रलोकेनकामोहंत्वत्सान्निध्यमिहागतः।।त्वत्समृद्धिमिमांपश्यन्स्त्रीरत्नसहितोध्रुवं।तर्कयामिगिरी
शत्वदन्यस्त्रैलोक्येनसमृद्धिमान्।अप्सरोनागकन्याद्यायद्यपित्वद्गृहेस्थिताः।तथापितानपार्वत्यारूपेणासदृश्योध्रुवं।सौं
दर्यगर्वहणेभ्राम्यन्नूनंबर्बरीरूपयापरा।यस्यालावण्यजलधौनिमग्नश्चतुराननः।स्ववीर्यमुत्सृष्टवांस्तयाकान्योपमीयते।
बालरागोपिहृद्ययामदनारिःस्वलीलया।विश्वस्तत्रोपियत्नःसवामावक्रोगःकृतः।।तस्याःपुनःपुनःपश्यन्रूपंधात्ता
विभूषितः।ससर्जाप्सरस्तासांतत्समेकापिनाभवत्।अतस्त्रीरत्नसंभोक्तुःसमृद्धिस्त्वय्येवसावरा।तथानतवदेवेंद्रस
र्वरत्नाधिपस्यच।।एवमुक्तोत्तमामेध्यगतोमायिसदैत्यराट्।तद्रूपस्मरपाशासीदनंगज्वरपीडितः।।अथसंप्रेषयामा
ससदूतांसिंहिकासुतं।।त्र्यंबकायतदाकिंचिद्विष्णुमायाविमोहितः।।कैलासमगमद्राहुःकुर्वन्भ्रुकुटिदुर्वर्चसं।कालेनेवकृ
ष्णपक्षेंदुसदृशंस्वागतेजसं।।निवेदितस्तद्देशायनंदिनाचप्रवेशितः।।त्र्यंबकेभ्रूकृतेतांसंज्ञांप्रेरितोवाक्यमब्रवीत्।।राहुरु
उवाच।।देवपन्नगसेव्यस्यत्रैलोक्याधिपतेस्तथा।सर्वरत्नेश्वरस्यत्वंमाज्ञांशृणुमहाप्रभो।श्मशानवासिनोनित्यंअस्थि
भारवस्यच।दिगंबरस्यतेभार्याकथंहैमवतीशुभा।अहंरत्नाधिनाथोस्मिसाचस्त्रीरत्नसंज्ञिता।तस्मान्ममैवसायोग्यानैवभि
क्षाशिनस्तव।।नारदउवाच।वदत्येवंतदाराहुर्भ्रूमध्याच्छूलपाणिनः।अभवत्पुरुषोरौद्रस्तीव्राशनिसमस्वनः।।सिंहास्यःप्र ॥१२॥
लंबिहस्तज्वालनयनोमहान्।ऊर्ध्वकेशःशुष्कतनुर्नृसिंहइवचापरः।सतंखादितुमायांतंदृष्ट्वाराहुर्भयातुरः।अभ्यधा
वतवेगेनबहिःकक्षेदधारतं।।राहुरुवाच।।ब्राह्मणोहंमहादेवखादितुंहिसमागतः।।महादेवोवचःश्रुत्वाब्राह्मणस्य
तदाब्रवीत्।।ईश्वरा

खादितुमारब्धस्तावद्रुद्रेणवारितः॥ नैवासौवध्यतामेतिदूतोयंपरवान्यतः॥ तथेतिपुरुषःश्रुत्वा
राहुंतत्याजसोंबरे॥ सरुद्रंत्यक्त्वासपुरुषस्तदारुद्रंव्यजिज्ञपत्॥ ॥पुरुषउवाच॥ ॥क्षुधामांबा
धतेस्वामिन्क्षुत्क्षामश्चास्मिसर्वथा॥ किंभक्षयाम्यहंदेवतदाज्ञापयमांप्रभो॥ ॥ईश्वरउवाच॥
भक्षयस्वात्मनःशीघ्रंमांसंत्वंहस्तपादयोः॥ नारदउवाच॥ ॥शिवेनैवंतदाज्ञप्तस्स्वखादःपुरुष
स्वकं॥ हस्तपादोद्भवंमांसंशिरःशेषोभवत्तदा॥ दृष्ट्वाशिरोवशिष्टंतुसुप्रसन्नस्तदाशिवः॥उवाच
भीमकर्माणंपुरुषंजातविस्मयः॥ईश्वरउवाच॥ ॥त्वंकीर्तिमुखसंज्ञोवैभवमद्द्वारिकःसदा॥त्वद
र्चायेनकुर्वंतिनैवतेमत्प्रियंकराः॥ ॥नारदउवाच॥ ॥तदाप्रभृतिदेवस्यद्वारेकीर्तिमुखस्थितः॥
नार्चयंतिहपूर्वंयेतेषामर्चावृथाभवेत्॥ राहुर्विमुक्तोयस्तेनसोपतद्बर्बरस्थले॥ अतःसर्बबरोद्भूतइ
तिभूम्निप्रथांगतः॥ ततःसराहुःपुनरेवजातमात्मानमस्मिन्नितिमन्यमानः॥ समेत्यसर्वंकथयांबभू
वजलंधरायेत्थंविचेष्टितंतत्॥ ॥इतिश्रीपद्मपुराणेकार्तिकमहात्म्येद्वादशोध्यायः॥ ॥नारदउवाच॥
जलंधरस्ततच्छ्रुत्वाकोपाकुलितविग्रहः॥ निर्जगामाशुदैत्यानांकोटिभिःपरिवारितः॥ गच्छतोग्रागतः

शुक्रोधाद्रुद्रदृष्टिस्थितोभवत्॥ मुकुटःप्रापतद्भूमौवेगाद्धस्तचालितस्तदा॥ दैत्यसैन्यावृतैस्तस्याविमानानांग्र
तैस्तथा॥ व्यराजतनभःपूर्वंप्रावृषीवयथाघनैः॥ तस्योद्यमंतथादृष्ट्वादेवाःशक्रपुरोगमाः॥ आभी
ताःसहवैराजग्मुःशूलिनंतेव्याजिज्ञपुः॥ ॥देवाऊचुः॥ ॥नजानासिकथंस्वामिन्देवापत्तिमिमांप्रभो॥
तदस्मद्रक्षणार्थायजहिसागरनंदनं॥ ॥नारदउवाच॥ ॥इतिदेववचःश्रुत्वाप्रहस्यवृषभध्वजः॥
महाविष्णुंसमाहूयवचनंचेदमब्रवीत्॥ ॥ईश्वरउवाच॥ ॥जलंधरःकथंविष्णोनोहतःसंगरेत्वया॥
त्वद्गृहंचापियातोसिहित्वावैकुंठमात्मनः॥ ॥विष्णुरुवाच॥ ॥तवांशसंभवत्वाच्चभ्रातृत्वाच्चतथा
श्रियः॥ नमयानिहतःसंख्येत्वमेनंजहिदानवं॥ ॥ईश्वरउवाच॥ ॥नायमेभिर्महातेजाःशस्त्रैर्व
ध्यतेमया॥ देवैश्चस्वस्वतेजांसिशस्त्रार्थंदीयतांमम॥ ॥नारदउवाच॥ ॥अथेंद्रप्रमुखादेवाःस्वस्व
तेजांसिददुस्तदा॥ तान्येकमागतानीशोदृष्ट्वास्वंचामुचन्मुहुः॥ तेनाकरोन्महादेवोमहसाशस्त्रमद्भुतं॥ च
क्रंसुदर्शनंनामज्वालामालातिभीषणं॥ तेजःशेषेणचतदावज्रंचकृतवान्हरः॥ तावज्जलंधरोदृष्ट्वाकै ॥१४॥
लासस्थितिभूमिषु॥ हस्त्यश्वरथपत्तीनांकोटिभिःपरिवारितः॥ तंदृष्ट्वाभयतोजग्मुर्देवाःसर्वेयथागताः॥

गणाश्च समनह्यंत फद्भायातिखरान्विताः ॥ नंदीभृंगीवसेनानीमुखाः सर्वेनृवाज्ञया ॥ अवतेरुर्ग
णावेगात्कैलासात्फद्रदुर्मदाः ॥ ततेसमभवद्युद्धं कैलासोपत्यकाभुवि ॥ प्रमथाधिपदैत्यानां घोरस्त्रा
स्त्रास्त्रसंकुलं ॥ भेरीमृदंगतूर्याणां घोषनिस्वनैर्वधिरं र्षहर्षयोः ॥ गजाश्वरथनृष्ठेभ्यनादिताभूर्व्यकंपत ॥
शक्तितोमरबाणौघैर्मुसलप्रासपट्टिशैः ॥ व्यराजेतनभः पूर्णमुक्ताभिरिवसंवृतं ॥ निहतैरथनागा
श्वैः पत्तिभिर्भूर्व्यराजत ॥ वज्राहतांचविनीरसंशूकलैरिवसंवृता ॥ प्रमथाहतदैत्योघैर्दैत्याहतगणौ
स्तथा ॥ वसासृङ्मांसपंकाद्या भूरगम्याबभूवतदा ॥ प्रमथाहतदैत्योघ युद्धेपुनः
सद्यतदामृतं संजीवनीबलात् ॥ तंदृष्ट्वाव्याकुलीभूताः गणाः सर्वेभयार्दिताः ॥ नंदीभृंगीमुखैर्वायतत्स
र्वेशुक्रचेष्टितं ॥ अथरुद्रमुखाद्भूत्याबभूवातीवभीषणा ॥ तालयोजंदरीवक्त्रास्तनपीडितभूरुहा ॥
सायफध्यभ्रामिमासाद्यभक्षयंतीमहासुरान् ॥ भार्गवंसहसाधृत्वाजगामांतर्हितानभः ॥ भार्गेकृत्वापुन
श्चैयं जहासोच्चैर्द्विजेत्तिच ॥ विध्वस्तंभार्गवंदृष्ट्वादैत्यसेनाभयात्तदा ॥ प्रम्लानवदनाहर्षान्निर्जग्मुर्युद्ध
दुर्मदाः ॥ अथाभज्यतदैत्यानां सेनागणभयार्दिताः ॥ वायुवेगातोयवृक्षकीर्णातृणर्हेसंती ॥ भयंगणभया

स्तेनांद्दृष्ट्वामर्षफुत्तायुयुः॥निशुंभशुंभौसेनान्यौकालनेमिश्चवीर्यवान्॥पर्यस्तांवारयामासुर्दैत्यसेनां
॥१५॥ महाबलाः॥मुचंतःशरवर्षाणिप्रावृषीवबलाहकाः॥ततोदैत्यशरौघास्तेशलभानामिवव्रजाः॥रुरु
धुःखंदिशःसर्वागणसेनांप्रकंपयन्॥गणाःशरास्तेभिन्नारुधिरासारवर्षिणः॥वसंतेकिंशुका
भासेनप्राज्ञायतकिंचन॥पतिताःपात्यमानाश्चछिन्नभिन्नास्तथागणाः॥स्यहाःसंग्रामभूमिंतेसर्वे
पिविमुखाभवत्॥ततप्रभग्नंस्वबलंविलोक्यशैलादिलंबोदरकार्त्तिकेयौः॥शराचितादैत्यवरान्प्र
सह्यानिवारयामासुरमर्षिणास्त्रे॥ ॥इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येत्रयोदशोध्यायः॥ ॥
नारदउवाच॥ ॥गणाधिपान्तिरुद्दृष्ट्वानंदीप्रमुखषण्मुखान्॥अमर्षादभ्यधावंतद्वंद्वयुद्धायदा
नवाः॥नंदिनंकालनेमिश्चशुंभोलंबोदरंतथा॥निशुंभःषण्मुखंवेगादभ्यधावंतदंशिताः॥निशुंभः
कार्त्तिकेयस्यमयूरंपंचभिःशरैः॥हृदिविव्याधवेगेनमूर्छितःसपपातह॥ततःशक्तिधरःशक्तिंया ॥१५॥
वज्रगाढरोषितः॥तावन्निशुंभोवेनस्वशक्त्यातामपातयत्॥ततोशरव्रातैःकालनेमिमवध्यत॥स
प्ताश्चैर्भिर्हयान्केतुंनंदीसारथिमच्छिनत्॥कालनेमिश्चसंक्रुद्धोधनुश्चिच्छेदनंदिनः॥तदपास्यत्रिशूले

नत्संवक्षस्याहनद्दृढं ।। सशूलाच्छिन्नहृदयो हताश्वो हतसारथिः ।। अद्रेः शृंगीरवरमासुच्यन्नेलादिंसोप
पातयत् ।। अथशुंभगणेनूश्चरणमूषकवाहनो ।। क्रध्यमानौ शरव्रातैः परस्परमवध्यतां ।। गणो
नाश्वततथाशुंभं हृदिविव्याधपत्रिणा ।। सारथिंचत्रिभिर्हत्वापातयामाससभूतले ।। ततः क्रुद्धोशुंभो
पिबाणषष्ठ्यागणाधिपं ।। मूषकंचत्रिभिर्विध्यानना दजल्लदस्वनः ।। मूषकः शरैरभिन्नांगश्च
चालहृदवेदनः ।। लंबोदरश्चपातितः पदातिरभवन्नृप ।। ततोलंबोदरः शुंभं हत्वापरशुनाहृदि ।
अपातयत्तदाभूमौमूषकंचारुरोहसुनः ।। कालनेमिर्निशुंभश्चउभौलंबोदरंशरैः ।। फगपज्जघ्नतुः
क्रोधात्तत्रैवमहाद्विपं ।। तंपीड्यमानमालोक्यवीरभद्रोमहाबलः ।। अभ्यधावत्तवेगेनभूत
कोटियतस्तदा ।। कूष्मांडाभैरवश्चापिवेतालायोगिनीगणाः ।। क्षेत्रपालाः पिशाचाहितेताश्चा
पितमन्वयुः ।। ततः किलकिलाकृष्टैः सिंहनादैः सघर्घरैः ।। नादितैर्डमरुकैश्चपृथिवींसमकं
पयत् ।। ततोभूतान्यधावंतभक्षयंतिस्मदानवान् ।। उत्प्लुत्यनिपातितिस्मनन्हतश्चरणांगणो ।।
नंदीचकार्त्तिकेयश्चसमाश्वस्तोहराच्चितो ।। निजघ्नतूरवौदैत्यान्शरव्रातैर्निरंतरं ।। छिन्नभिन्नाह

तैर्दैत्यैःपातितैर्भीक्षितैस्तथा॥व्याकुलासाभवत्सेनाविषण्णवदनातदा॥विध्वंसितांतदासेनांदृष्ट्वा
॥१६॥ सागरनंदनः॥रथेनातिपताकेनगणानभिययौबली॥हस्त्यश्वरथसंघाताःशंखभेरीरवास्तदा॥
अभवन्सिंहनादाश्चसेनयोरुभयोरपि॥जलंधरशरव्रातैर्नीहारपटलैरिव॥द्यावापृथिव्योर
च्छिन्नमंतरंसमपद्यत॥गणेशंपंचभिर्विद्ध्वानंदिनंनवभिःशरैः॥वीरभद्रंचविंशत्याननादजल
निस्वनः॥कार्त्तिकेयस्ततोदैत्यंशक्त्याविव्याधसत्वरः॥सघूर्णःशक्तिभिर्भिन्नःकिंचिद्व्याकुलमा
नसः॥ततःक्रोधपरीताक्षःकार्त्तिकेयंजलंधरः॥गदयाताडयामाससचभूमितलेऽपतत्॥तथै
वनंदिनंकोपात्पातयत्सभूतले॥ततोगणेश्वरःक्रुद्धोगदांपरशुनाच्छिनत्॥वीरभद्रस्त्रिभिर्बाणै
र्हृदिविव्याधदानवं॥सप्तभिश्चहयान्केतुंधनुश्छत्रंचसोऽच्छिनत्॥ततोऽतिक्रुद्धोदैत्येंद्रःशक्तिमुग्र
प्रदारुणां॥गणेशंपातयामासरथंचान्यमथारुहत्॥अभ्ययाद्द्रुतवेगेनवीरभद्रंरुषान्वितः॥त ॥१६॥
तस्तौसूर्यसंकाशौयुयुधातेपरस्परं॥वीरभद्रःपुनस्तस्यहयान्बाणैरपातयत्॥धनुश्चैवाच्छिनद्दे
दैत्यःप्लुत्वापरिघायुधः॥ ॥नारदउवाच॥ ॥सवीरभद्रंत्वरयाभिगम्यजघानदैत्यःपरिघेणमूर्ध्नि॥

सचापिवीरःप्रविभिन्नमूर्द्ध्नोपपातभूमौरुधिरंसमुद्गिरन्॥ ॥इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येवी
रभद्रपतनंनामचतुर्दशोध्यायः॥ ॥नारदउवाच॥ ॥पतितंवीरभद्रंतुदृष्ट्वारुद्रगणास्तदा॥आगच्छ
न्समरेहित्वाकोनुमामानामहेश्वरं॥अथकोलाहलंश्रुत्वागणानांचंद्रशेखरः॥अभ्ययाद्वृषभारूढःसं
ग्रामंप्रहसन्निव॥रुद्रमायांतमालोक्यसिंहनादैर्गणाःपुनः॥निवृत्ताःसंगरेदैत्यान्निजघ्नुःशरवृष्टि
भिः॥दैत्यास्त्वभीषणंरुद्रंदृष्ट्वासर्वेपिदुद्रुवुः॥कार्त्तिकव्रत्तिनंदृष्ट्वापातकानीवतद्द्रयात्॥अथजालं
धरोदैत्यान्विद्रुतान्प्रेक्ष्यसंगरे॥रोषादधावच्चंडांगंमुंचन्बाणान्सहस्रशः॥शुंभोनिशुंभश्चप्रमुखः
कालनेमिर्बलाहकः॥खड्गरोमाप्रचंडश्चघस्मराद्याःस्त्रिवैययुः॥बाणांधकारसंछन्नंदृष्ट्वागण
बलंशिवः॥तद्बाणजालंप्राच्छिद्यस्वबाणैरावृतंनभः॥दैत्यांश्चबाणवर्षाभिःपीडितानिकरोत्तदा॥प्र
चंडबाणजालौघैरपातयत्तभूतले॥खड्गरोम्णःशिरःकायात्तथापरशुनाछिनत्॥बलाहकस्यचशिरः
खट्वांगेनाकरोद्द्विधा॥बद्ध्वाचघस्मरंदैत्यंपाशेनाभ्यहनद्भुवि॥वृषवेगहताःकेचित्केचिद्बाणैर्निपाति
ताः॥न्नशेकुःसमरेस्थातुंगजाःसिंहार्दिताइव॥ततःकोपपरीतात्माधृणाद्दुर्द्धर्जलंधरः॥आहूया

मासससमरेसौ श्रान्तानिसमस्वनः॥ ॥जलंधरउवाच॥ ॥कध्यस्वाद्यमयासार्द्धंकिमेभिर्निहतैस्तव॥यद्य
 किंचिद्बलंतेस्तितद्दर्शयजटाधर॥ ॥नारदउवाच॥ ॥इत्युक्त्वाबाणासप्तत्याजघानवृषभध्वजं॥तत्रा
प्तंछित्वैबाणोघंछिछेदप्रहसन्निव॥ ॥ततोहयध्वजंछत्रंधनुश्चिछेदसप्तभिः॥सछिन्नधन्वाविरथोग
दामुद्यम्यवेगवान्॥अभ्यधावछिवंतावद्रुद्रोबाणेर्द्विधाछिनत्॥तथापिमुष्टिमुद्यम्यययौरुद्रंजिघांसया
तावछिवेनबाणोघैःक्रोशमात्रमपाकृतः॥ततोजलंधरोदैत्योज्ञात्वारुद्रंबलाधिकं॥ससर्जमायांगांधर्वींअ
द्भुतांरुद्रमोहिनीं॥जगुश्चतत्रगंधर्वाननृतुश्चाप्सरोगणाः॥तालवेणुमृदंगांश्चवादयंतिस्मचापरे॥तंदृ
ष्ट्वामहदाश्चर्यंरुद्रोनादविमोहितः॥पतितान्यपिशस्त्राणिकरेभ्योनविवेदसः॥एकाग्रीभूतमालोक्यरु
द्रंदैत्योजलंधरः॥कामार्त्तःसजगामाशुयत्रगौरीस्थिताभवत्॥युद्धेशुंभनिशुंभाख्यौस्थापयित्वामहा
बलौ॥दशदोर्दंडपंचास्यस्त्रिनेत्रश्चतदाहरः॥महावृषंसमारूढःसबभूवजलंधरः॥अथरुद्रःसमायां
तमालोक्यभववल्लभा॥अभ्यायांयोसखीमध्यात्तद्दर्शनपथेभवत्॥यावद्ददर्शचार्वंगीपार्वतीदनुजेश्व 
रः॥तावत्सवीर्यंमुमुचेजडांगश्चाभवत्तदा॥अथज्ञात्वातदागौरीदानवंभयविह्वला॥जगामांतर्हितावेगात्सा

यदोत्तरमार्गेण ॥ तामदृष्ट्वाततोदैत्यःक्षणार्धेदिविलुप्तामिव ॥ जवेनागात्पुनर्युद्धेयत्रदेवोवृषध्वजः ॥
पार्वत्यपिमहाविष्णुंसस्मारमनसातदा ॥ तावद्ददर्शतंदेवमुपविष्टंसमीपगं ॥ ॥पार्वत्युवाच ॥ ॥
विष्णोजालंधरोदैत्यःकृतवान्परमाद्भुतं ॥ तत्किंनविदितंतेस्तिचेष्टितंतस्यदुर्मतेः ॥ ॥विष्णुरुवा
च ॥ ॥तेनैवदर्शितःपंथावयमप्यान्वियामहे ॥ नान्यथासवध्यःपातिव्रत्यस्यरक्षितः ॥ ॥नारदउ
वाच ॥ ॥जगामविष्णुरित्युक्त्वापुनर्जालंधरंपुरं ॥ अश्रुवदेवगंधर्वाःखगतैःशंकरस्थिताः ॥ अंतर्धान
गतंमायांदृष्ट्वाचबुबुधेतदा ॥ ततःस्त्रीवोविस्मितमानःपुनर्जगामकद्धायजलंधररूपा ॥ सचापिदैत्यः
पुनरेवयांतंदृष्ट्वारौद्रैःसमवारयद्रणे ॥ ॥इतिश्रीपद्मपुराणेकार्त्तिकमहात्म्येपंचदशोध्यायः ॥
॥नारदउवाच ॥ ॥विष्णुर्जालंधरंगत्वातत्सुरदैत्यभेदनः ॥ पातिव्रत्यस्यभंगायवृंदायाश्चाकरोन्मतिं ॥
अथवृंदारिकादेवीस्वप्नमध्येददर्शह ॥ भर्तारंमाहिषारूढंतैलाभ्यक्तंदिगंबरं ॥ कृष्णप्रसूनभूषाढ्यं
क्रव्यादगणसेवितं ॥ दक्षिणाशांगतंमुंडंतमसाव्याहृतंतदा ॥ स्वपुरंसागरेमग्नंसहचैवात्मनासह ॥ त
तःप्रबुद्धासाबालातंस्वप्नंविचिन्वती ॥ ददर्शोदितमादित्यंसच्छिद्रंनिःप्रभंमुहुः ॥ तदारिष्टमितिज्ञात्वा
रुदती भयविह्वला ॥ कुत्रापिनलभेच्छर्मगोपुरोद्दालभूमिषा ॥ ततःसखीद्वययुतानगरोद्यानमागमत् ॥

तत्रापिसाभ्रमयद्बालानालभत्कुत्रचित्सुखं।।वनाद्वनांतरंयातातान्वैवेदात्मनस्तदा।।तत्रसाभ्रमतीबाला
।।१८।। ददर्शातीवभीषणौ।।राक्षसौसिंहवदनौदंष्ट्रादर्शनभास्करौ।।तौदृष्ट्वाविह्वलात्तीवपलायनपराभवत्।।द
दर्शतापसंशांतंससिष्यंमौनमास्थितं।।ततस्तत्कंठमासाद्यनिजांबाहुलतांभयात्।।मुनेमांरक्षशरण
मागतास्मीत्यभाषत।।मुनिस्तांविह्वलांदृष्ट्वाराक्षसानुगतांतदा।।हुंकारेणैवघोरेणचकारविमुखौ
तदा।।तद्धुंकारभयत्रस्तौदृष्ट्वातौविमुखौसतौ।।प्रणम्यदंडवद्भूमौवृंदावचनमब्रवीत्।। ।।वृंदोवाच।।
रक्षिताहंत्वयाघोरात्भयादस्मात्कृपानिधे।।किंचिद्विज्ञप्तुमिच्छामिकृपयातन्निशामय।।जलंधरोहि
मद्भर्तारुद्रंयोद्धुंगतःप्रभो।।सतत्रास्तेकथंयुद्धेतन्मेकथयसुव्रत।। ।।नारदउवाच।। ।।मुनिस्तद्वा
क्यमाकर्ण्यकृपयोर्ध्वमवेक्षत।।तावत्कपीसमायातौतंप्रणम्याग्रतःस्थितौ।।ततस्तद्भ्रूलतासं
ज्ञानियुक्तौगगनेगतौ।।गत्वाक्षणार्द्धादागत्यप्रणम्यचाग्रतःस्थितौ।।शिरःकबंधहस्तौतौतंदृष्ट्वा
ब्धिसुतनयस्यसा।।पपातमूर्छिताभूमौभर्तृव्यसनदुःखिता।।कमंडलुजलासिक्तामुनिनाश्वासि ।।१८।।
तातदा।।स्वभर्तृमालसाभालेकृत्वादीनारुरोदह।। ।।वृंदोवाच।। ।।यःपुरासुखसंभावैर्विनोद
यसिमांप्रभो।।सकथंभवदस्यद्यवल्लभामामनागसं।।येनदेवाःसगंधर्वानिर्जिताविष्णुनासह।।

सकथंतापसेनाथत्रैलोक्यविजयीहतः॥ ॥नारदउवाच॥ ॥इत्युदितोतितदावृंदांमुनिर्वाक्यमथाब्रवीत्॥
॥वृंदोवाच॥ ॥कृपानिधेमुनिश्रेष्ठजीवयैनंममप्रियं॥त्वमेवास्यपुनःशक्तोजीवनायमतोमम॥ ॥नारदोवा
च॥ ॥इतितद्वाक्यमाकर्ण्यप्रहस्यमुनिरब्रवीत्॥नायंजीवयितुंशक्तोरुद्रेणनिहतोयुधि॥तथापित्वत्कृ
पाविष्टोएवंसंजीवयाम्यहं॥ ॥नारदउवाच॥ ॥इत्युक्त्वांतर्दधेविप्रस्तत्रसागरनंदनः॥वृंदामालिंग्यतद्व
क्त्रंचुचुंबेप्रीतमानसः॥अथवृंदापिभर्त्तारंलब्ध्वाहर्षसमन्विता॥रेमेतद्वदनमध्यस्थातत्कृताबहुवासरं॥
कदाचित्सुरतस्यांतेदृष्ट्वाविष्णुंतमेवहि॥शंखचक्रगदापद्मैर्युक्तंतंविष्णुमेवहि॥निर्भर्त्स्यक्रोधसंयुक्तावृंदा
वचनमब्रवीत्॥ ॥वृंदोवाच॥ ॥धिकृतववेदंहरेशीलंपरदाराभिगामिनः॥ज्ञातोसित्वंमयासम्यक्माया
प्रच्छन्नतापसः॥योत्वयामाययाह्यास्थौदर्शितौतौराक्षसौमम॥तौचतौराक्षसौभूत्वाभार्यांतेवनेग्रीथ्यतः॥त्वं
चापिभार्यादुःखार्त्तोवनेकपिसहायवान्॥भव - - - - - - - - - - यस्तेशिष्यत्वमागतः॥इत्युक्त्वाथत
दावृंदाप्राविशद्द्रव्यवाहनं॥विष्णुनावार्यमाणापितस्यमासक्तचेतसा॥ततोहरिस्तामनुसंस्मरन्मुहुर्वृंदाचितां
ताभस्मरजोवगुंठितः॥तत्रैवतस्थौसुरसिद्धसंघैःप्रबोध्यमानोपिययौनशांतिं॥ ॥इतिश्रीपद्मपुराणे
कार्तिकमाहात्म्येषोडशोध्यायः॥ ॥नारदउवाच॥ ॥ततोजलंधरोदृष्ट्वारुद्रमद्भुतविक्रमं॥चकारमाय

यागौरी त्र्यंबकं मोहयन्निव ।। रथोपरिगतां बद्धां पार्वतीं रुदतीं तु सः ।। निशुंभशुंभमुख्यैश्च बध्यमानां द
।।१९।। दर्शसः ।। अवाङ्मुखस्थितस्तूर्णं विस्मृत्य स्वपराक्रमं ।। ततो जलंधरो वेगात्त्रिभिर्विव्याध सायकैः ।। आ
पुंखाग्रैस्ततं रुद्रं मूर्ध्नि स्फरसि चोदरे ।। ततो जज्ञे स तां मायां स्वमायात्स्वीति बोधितः ।। रुद्ररूपधरो जातो
ज्वालामालातिभीषणः ।। तस्यातीव महारौद्रं रूपं दृष्ट्वा महासुराः ।। नशेकुः प्रमुखे स्थातुं भेजिरे ते दि
शोदश ।। ततः शापं ददौ रुद्रस्तयोः शुंभनिशुंभयोः ।। मम युद्धाय यातौ वा गौर्या वध्यौ भविष्यथ ।। पुन
र्जलंधरो वेगाद्ववर्ष निशितैः शरैः ।। ततः परमसंक्रुद्धो रुद्रो रौद्रवपुर्धरः ।। चक्रं सुदर्शनं वेगाच्चिक्षेपा
दित्यवर्चसं ।। ब्रह्महृद्रोदसी वेगात्स दासच जलंधरं ।। जहार तच्छिरः कायान्महदायतलोचनं ।। रथात्काया
प्रपात स नादयन्वसुधातलं ।। तेजश्च निर्गतं दैत्यात्तद्रुद्रे लयमागमत् ।। वृंदादेहोद्भवं तेजस्तद्गौर्यां
विलयं गतं ।। अथ ब्रह्मादयो — — — — — — — — लोचनाः ।। प्रणम्याग्नीरसा रुद्रं न्नान्नं स्फ विष्णुचेष्टितं ।।
।। देवा ऊचुः ।। ।। महादेव त्वया देवा रक्षिताः शत्रुजाद्भयात् ।। किंचिदन्यत्समुद्भूतं तत्र किं करवावहे ।। वृं ।।१९।।
दालावण्यसंभ्रांतो विष्णुस्तिष्ठति मोहितः ।। ।। ईश्वर उवाच ।। ।। गच्छध्वं शरणं देवा विष्णुमोहापनुत्त
ये ।। शरण्यां मोहिनीं मायां सा वः कार्यं करिष्यति ।। ।। नारद उवाच ।। ।। इत्युक्त्वांतर्दधे देवः सहभूतगणैः सह ।।

देवाश्चतुष्टुवुर्मूलप्रकृतिंभक्तवत्सलां ॥ ॥देवाऊचुः॥ ॥येदुद्भवाःसत्वरजस्तमोगुणाःसर्गस्थितिध्वंस
निदानकारणां ॥ यदिछयाविश्वमिदंभवाभवौतनोतिमूलप्रकृतिंनताःस्मतां ॥ याहित्रयोविंशतितत्वसंज्ञा
तंजगास्यनूबेसमधितिष्ठतापरा ॥ यद्रूपकर्मायिजडास्त्रयोपिदेवाभवंतिस्वांमूलप्रकृतिंनताःस्मतां ॥
यच्छक्तियुक्ताःपुरुषाश्चनित्यंसंसारिद्रुमेकोपिहराभवादीन् ॥ नपाक्षवंत्येवहिभक्तवत्सलांसदैवमूलप्रकृ
तिंनताःस्मतां ॥ ॥नारदउवाच ॥ ॥स्तोत्रमेतत्पठेद्यस्तु एकाग्रकृतमानसः ॥ दारिद्र्यमोहदुःखानिकदा
चित्स्पृशंतितं ॥ इत्थंतुस्तुवतांदेवास्तेजोमंडलमास्थितां ॥ ददृशुर्गगनेनेत्रज्वालाव्याप्तदिगंतरं ॥ तन्मध्या
भारतीसर्वेशुश्रुवुर्व्योमचारिणीं ॥ ॥आद्याशक्तिरुवाच ॥ ॥अहमेवत्रिधाभिन्नातिष्ठामित्रिविधैर्गु
णैः ॥ गौरीलक्ष्मीस्वरस्वतीतिरजःसत्वतमोगुणैः ॥ तत्रगछयतांकार्यंविधास्यंत्येववःस्फुराः ॥ ॥नार
दउवाच ॥ ॥श्रृण्वतामितितांवाचमंतर्धानमगान्महः ॥ देवानांविस्मयोत्फुल्लनेत्राणांतत्क्षणान्नृप ॥ सर्वेपि
तेदेवाःगत्वातद्वाक्यनोदिताः ॥ गौरींलक्ष्मींस्वरांचैवप्रणेमुर्भक्तितत्पराः ॥ ताश्चतयातान्स्फुरादृष्ट्वाप्र
णतान्भक्तवत्सलान् ॥ बीजानिप्रददुस्तेभ्योवाक्यानिचतदोदिरे ॥ ॥देव्यऊचुः ॥ इमानितत्रबीजानि

विष्णुयात्रावतिष्ठति॥ निर्वपध्वंततोदेवाभवंतः सिद्धमीप्सथ॥ ॥नारदउवाच॥ ॥ततस्तेहृष्टाः सुर
॥२०॥ सिद्धसंघाः प्रगृह्यबीजानिविचिक्षिपुश्च॥ वृंदाचितांभूमितलेसयत्रविष्णुः सदातिष्ठतिसोख्यमू
र्तिः॥ ॥इतिश्रीपद्मपुराणेकार्त्तिकमहात्म्येसप्तदशोध्यायः॥ ॥नारदउवाच॥ ॥क्षिप्तेभ्यस्तत्र
बीजेभ्योवनस्पत्यस्त्रयोभवन्॥ धात्रीचमालतीचैवतुलसीचनृपोत्तम॥ धात्र्युद्भवास्मृताधात्रीमा
भवामालतीस्मृता॥ गौरीभवातुलसीतु सीतमः सत्वरजोगुणाः॥ स्त्रीरूपिण्योवनस्पत्योदृष्ट्वाविष्णु
स्तदानृप॥ उत्तिष्ठत्संभ्रमाद्वृंदारूपातिशयविभ्रमः॥ दृष्ट्वाश्चतेनसामागात्कामासक्तेनचेतसा॥
तंचापितुलसीधात्र्योरागेणेवावलोकयन्॥ यत्तेल्लक्ष्म्याःपुराबीजमीर्ष्ययैवसमर्पितं॥ तस्मात्तद्भवा
नारीतस्मिन्निर्ष्योपराभवत्॥ अतस्त्वयाबर्बराख्याप्राप्ताचातीवगर्हिता॥ धात्रीतुलस्योरुद्रागात्तस्य
प्राप्तिप्रदेसदा॥ ततोविस्मितदुःखोसोविष्णुस्ताभ्यांसहैवतु॥ वैकुंठमगमद्हृष्टः सर्वदेवनमस्कृतः॥ ॥२०॥
कार्त्तिकोद्यापनंविष्णोस्तस्मात्पूजाविधीयते॥ तुलसीमूलदेशास्यप्रीतिदाचतस्मृता॥ तुलसीकान
नंराजन्गृहेयस्यावतिष्ठति॥ तद्गृहंतीर्थभूतंतुनायातियमकिंकराः॥ सर्वपापहरंपुण्यंकामदंतु

लसीव्रतं। रोपयंति नराः श्रेष्ठास्तेन पश्यंति भास्करं॥ दर्शनं नर्मदायास्तु गंगास्नानं तथैव च। तुलसी
वनसंसर्गः सममेतत्त्रयं स्मृतं। रोपणात्पालनात्सेकाद्दर्शनात्स्पर्शनान्नृणां। तुलसी दहते पापं
वाङ्मनःकायसंस्थितं। तुलसीमंजरीभिस्तु कुर्याद्धरिहरार्चनं। नच गर्भगृहं याति मुक्तिभागी भवेन्न
रः॥ पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा। वासुदेवादयो देवा वसंति तुलसीदले। तुलसीमं
जरीयुक्तो यस्तु प्राणान्विमुंचति। यमोपि नेक्षितुं शक्तो युक्तः पापशतैरपि। तुलसीकाष्ठजं यस्तु चं
दनं धारयेन्नरः। तद्देहं न स्पृशंत्येव पापं क्रियमाणमपीह यत्। तुलसीविपिनच्छाया यत्र यत्र भवेन्नृप।
तत्र श्राद्धं प्रकर्त्तव्यं पितॄणां दत्तमक्षयं। धात्रीछायासु यः कुर्यात्पिंडदानं नृपोत्तम। मुक्तिं प्रयांति पि
तरस्तस्य योनिरयोस्थिताः। मूर्ध्नि पाणौ मुखे चैव देहे च नृपसत्तम। धत्ते धात्रीफलं चैव स विज्ञेयो ह
रिः स्वयं। धात्रीफलं तुलसी मृत्तिका द्वारकोद्भवा। यस्य देहे स्थितानि स्युः स जीवन्मुक्त उच्यते। धात्री
फलैस्तु संमिश्रैस्तुलसीदलसंयुतैः। जलैः स्नाति नरस्तस्य गंगास्नानफलं स्मृतं। देवार्चनगतैः कु
र्वन् धात्रीपत्रैः फलैस्तथा। सौवर्णैर्मणिपिष्ठकार्येसर्वंतस्यामयस्फलं। तीर्थानि भुवने देवा यज्ञाः स
र्वेपि कार्त्तिके। नित्यं धात्रीं समाश्रित्य यांति सूर्ये तुलास्थिते। द्वादश्यां तुलसीपत्रं धात्रीपत्रं च कार्त्तिके।

लुनाति स नरो गच्छेन्निरयान्नातिगर्हितान्॥ धात्रीछायां समाश्रित्य कार्त्तिकेन्नं भुनक्ति यः॥ अन्नं संसर्गजं पा
॥२१॥ पं मावर्षं तस्य नश्यति॥ धात्रीमूले च यो विष्णुं कार्त्तिके ह्यर्चयेन्नरः॥ विष्णुक्षेत्रेषु सर्वेषु पूजितस्तेन सर्वदा॥ धात्री
तुलस्योर्माहात्म्यं मपि वेधा चतुर्मुखः॥ न हि समर्थो भवेद्वक्तुं यथा देवस्य शार्ङ्गिणः॥ धात्रीतुलस्योद्भवकारणं यः
शृणोति वा श्रावयते च भक्त्या॥ विधूतपाप्मा सह पूर्वजैश्च स्वर्गं व्रजेत्स्वय विमाने संस्थितः॥ ॥इति श्रीपद्मपुरा
णे कार्त्तिकमाहात्म्ये अष्टादशोध्यायः॥ ॥पृथुरुवाच॥ ॥सेतिहासमिमं ब्रह्मन्माहात्म्यं कथितं त्वया॥ अत्या
श्चर्यकरं ब्रह्ममाहात्म्यं ह्येतदुत्तमं॥ यदुक्तं व्रतिनः पुंसः फलं महदुदाहृतं॥ तत्पुनर्ब्रूहि माहात्म्यं केन पूर्वं कृतं त्विदं
॥नारद उवाच॥ ॥आसीत्सह्याद्रिशिखरे करवीरपुरे द्विज॥ ब्राह्मणो धर्मवित्कश्चिद्धर्मदत्तेति विश्रुतः॥ विष्णु
व्रतकरः सम्यग्विष्णुपूजारतः सदा॥ द्वादशाक्षरविद्यायाजपनिष्ठोतिथिप्रियः॥ कदाचित्कार्त्तिके मासि हरिजा
गरणाश्रयः॥ रात्र्यां तुर्यांशशेषायां जगाम हरिमंदिरं॥ हरिपूजोपकरणान्यगृह्य व्रजता तदा॥ तेन दृष्टा समाया
ता राक्षसी भयनिस्वना॥ वक्रदंष्ट्रा ललज्जिह्वा निमग्नारक्तलोचना॥ दिगंबरा शुष्कमांसा लंबोष्ठी घर्घरस्वना॥ ॥२१॥
तां दृष्ट्वा भयसंत्रस्तः कंपितावयवस्तदा॥ पूजोपकरणैर्वेगात्सयोभिश्चाहनद्रुषात्॥ संस्मृत्य स हरेर्नाम
तुलसीफलतवारिणा॥ सो हनत्तां तकेन स्पर्शात्तस्मात्सर्वमगात्कलुषं॥ अथ संस्मृत्य सा पूर्वजन्मकर्मविपाक
जं॥ स्वां दशामब्रवीद्विप्रं दंडवच्च प्रणम्य सा॥ ॥कलहोवाच॥ ॥पूर्वकर्मविपाकेन दशामेतां गतास्म्यहं॥

तत्कथंतुपुनर्विप्रप्राप्स्याम्युत्तमांगतिंशुभां ।। ।।नारदउवाच ।। ।।तांदृष्ट्वाप्रणतांसम्यग्रेवंदमानांसकर्मवित् ।
अतीवविस्मितोविप्रःतदावचनमब्रवीत् ।। ।।धर्मदत्तउवाच ।। ।।केनकर्मविपाकेनत्वंद्रागामीदृशींगता ।।कु
तस्त्वाकाचाकिंशीलातत्सर्वंकथयस्वमे ।। ।।कलहोवाच ।। ।।सोराष्ट्रनगरेब्रह्मन्भिक्षुनामाभवद्द्विजः ।।त
स्याहंगृहिणीपूर्वंकलहाख्यातिनिष्ठुरा ।नकदाचिन्मयाभर्त्तुर्वचसापिप्रियंकृतं ।नार्पितंतस्यमिष्टान्नंभर्त्तु
र्वचनंकालया ।कलहाप्रिययानित्यंमयोद्विग्नःसदानरः ।परिणेतुंतदान्यांसंमतिंचक्रेपतिर्मम ।ततोग
रंसमादायप्राणांस्त्यक्तामयाद्विज ।अथबद्धाबध्यमानांविनिन्युर्यमकिंकराः ।यमश्चमांतदादृष्ट्वाचि
त्रगुप्तमपृच्छत ।। ।।यमउवाच ।। ।।अनयाकिंकृतंकर्मचित्रगुप्तविलोकय ।प्राप्नोत्येषाकर्मफलंशुभंवा
शुभमेववा ।। ।।चित्रगुप्तउवाच ।। ।।अनयात्तुशुभंकर्मकृतंकिंचिन्नविद्यते ।।मिष्टान्नंभुंजमानेयंन
भर्त्तरित्तदर्पितं ।अतश्चवल्गुलीयोनिंस्वविष्ठादावतिष्ठतु ।भर्त्तुर्द्वेषकरीह्येषानित्यंकलहकारिणी ।।
विष्ठादाशूकरीयोनिंनित्यंतिष्ठत्वियंरहः ।पाकभांडेसदाभुंक्तेनित्यंचैषायतस्ततः ।तस्मादेषाबिडाले
लुस्वजातापत्यभक्षिणी ।भर्त्तारमपिचोद्दिश्ययद्यात्मघातःकृतोनया ।तस्मात्प्रेतशरीरेपितिष्ठत्वेषा
तिदुर्हिता ।ततश्चैषामन्निदेशात्प्रापितव्याभटैर्हरे ।तत्रप्रेतशरीरेस्थाचिरंतिष्ठत्वियंयतः ।क्षुधयो

मित्रयंखेषाभुनक्त्यशुभकारिणी॥ ॥कलहोवाच॥ ॥साहंपंचभूतानिप्रेतदेहस्थिताकिल॥ क्षुत्तृड्भ्यांपी
॥२२॥ डितानित्यंदुःखितास्वेनकर्मणा॥ ततःक्षुत्पीडितानित्यंभ्रमंतीरेवणिजहंस्पे। आयातोदक्षिणादेशंकृष्णावेण्या
त्कसंगमात्॥ तत्तीरेसंश्रितोयावत्तावत्तस्यशरीरतः॥ जीवविष्णुगणैर्दूरंमयाकृष्टाबलादहं॥ ततःक्षुत्क्षाम
यादृष्टोभ्रमस्त्वयासंमयाद्विज॥ उद्धृत्तातुलसीवारिसंसर्गाद्वातयामम॥ तत्पापंकुरुविप्रेंद्रकथंमुक्तिमिया
म्यहं॥ योनित्रयाद्युग्रभवात्तस्माच्चप्रेतदेहतः॥ इत्थंनिशम्यकलहावचनंद्विजश्चतत्कर्मपाकभवविस्म
यदुःखमग्नः॥ तद्ग्लानिदर्शनकृपाचलचित्तवृत्तिर्ध्यात्वाचिरंसवचनंनिजगाददुःखात्॥ ॥इतिश्री
पद्मपुराणेकार्त्तिकमाहात्म्येएकोनविंशोध्यायः॥ ॥धर्मदत्तउवाच॥ ॥स्वद्ग्लानिदर्शनात्तस्मात्खि
न्नंचममममानसं॥ नेवनिर्वृत्तिमायातिस्थामनुध्यस्यदुःखितां॥ पातकंचतवात्युग्रंयोनित्रयविपाकदं॥ नै
वात्मैःक्षीयसेपुण्यैःप्रेतत्वंचातिगर्हितं॥ तस्माद्दाजन्मसंजनितंयन्मयाकार्त्तिकेव्रतं॥ तत्पुण्यस्यार्द्धभा
गेनसद्गतिंत्वमवाप्नुहि॥ कार्त्तिकव्रतपुण्येननसाम्यंयांतिसर्वथा॥ यज्ञदानानितीर्थानिव्रतान्यपि ॥२२॥
यशोध्रुवं॥ ॥नारदउवाच॥ ॥इत्युक्त्वाधर्मदत्तोसौयावत्तामभ्यषेचयत्॥ तुलसीमिश्रितोयेनश्री
वन्द्वादशाक्षरं॥ तावत्प्रेतत्वनिर्मुक्ताज्वलदग्निशिखोपमा॥ दिव्यरूपधराजातालावण्येनयथें

दिरा।।ततःसादंडवद्भूमौप्रणनामाथतंद्विजं।।उवाचचतदावाक्यंहर्षगद्गदभाषिणी।। ।।कलहोवा
च।। ।।त्वत्प्रसादाद्द्विजश्रेष्ठविमुक्तानिरयादहं।।पापाब्धौमज्जमानायास्त्वंनौभूतोसिमेध्रुवं।। ।।
नारदउवाच।। ।।इत्थंसावदतीविप्रंददर्शायांतमंबरात्।।विमानंभास्करप्रख्यंविष्णुरूपधरैर्यु
तैः।।अथसातद्विमानस्थाविलोक्याद्वीस्तावरोपिता।।पुण्यशीलसुशीलाभ्यामप्सरोगणसेवितां।।
तद्विमानंतदापश्यंस्तुधर्मदत्तःसविस्मयः।।पपातदंडवद्भूमौदृष्ट्वातौविष्णुरूपिणौ।।पुण्यशीलसुशी
लौचतमुत्थाप्यानतंद्विजं।।समभ्यनंदतांतद्वाक्यंऊचतुर्धर्मसंस्थितो।। ।।गणाऊचतुः।। ।।साधुसाधुद्विजश्रे
ष्ठयस्त्वंविष्णुरतःसदा।।दीनानुकंपीधर्मज्ञोविष्णुप्रियपरायणः।।आबाल्याद्यत्त्वयाचीर्णंतद्द्विविधंकार्तिकव्रतं।।
तस्मात्तस्यार्धदानेनपुण्यंद्विगुणमागतं।।बहुपुण्यस्यार्धभागेनयदस्याःपूर्वसंचितं।।जन्मांतरार्जितोद्भूतंपा
पंतद्विलयंगतं।।स्नानेनैवागतंपापंयदस्याःपूर्वकर्मजं।।हरिजागरणाद्येश्चविमानमिदमागतं।।स्थितावैकुं
ठभुवनंविष्णोःसान्निध्यरूपतां।।तेधन्याःकृतकृत्यास्तेतेषांचसफलोभवः।।यैर्भक्त्याराधितोविष्णुर्धर्मदत्त
त्वयायथा।।सम्यगाराधितोविष्णुःकिंनयच्छतिदेहिनां।।औत्तानपादिर्येनध्रुवत्वेस्थापितःपुरा।।यन्नाम
स्मरणादेवदेहिनोयांतिसद्गतिं।।ग्राहग्रस्तोनागेंद्रयन्नामस्मरणात्पुरा।।विमुक्तिंसान्निधिंप्राप्तोजातोयो

जयसंज्ञिकः॥अतस्त्वयार्चितोविष्णुस्त्वत्सान्निध्यंप्रदास्यति॥बहून्यब्दसहस्राणिभार्याद्वयफलस्यते॥अतः
॥२२॥ पुण्यक्षयेजातेयदायास्यसिभूतलं॥सूर्यवंशोद्भवोराजाविख्यातस्त्वंभविष्यसि॥नाम्नादशरथस्तत्रभार्या
द्वयफलतःपुनः॥तृतीययानयाचापियातेपुण्यार्धभागिनी॥तत्रापितवसान्निध्यंविष्णुर्दास्यतिभूतले॥
आत्मानंतवपुत्रत्वेप्रकल्प्यामरकार्यकृत्॥तवाजन्मव्रतादस्माद्विष्णुसंतुष्टकारकात्॥नयज्ञानवदाना
नितीर्थान्यधिकानिवै॥धन्योसिविप्राग्ययतस्त्वयेतद्व्रतंवरंतुष्टिकरंजगद्गुरोः॥सदभागास्तफलं
मुरारेःप्रणीयतंमुक्तिरियंसलोकता॥ ॥इतिश्रीपद्मपुराणेकार्तिकमाहात्म्येकलहोपाख्यानेविं
शोध्यायः॥ ॥इत्थंतद्वचनंश्रुत्वाधर्मदत्तःसविस्मयः॥प्रणम्यदंडवद्भूमौवाक्यमेतदुवाचह॥ ॥ध
र्मदत्तउवाच॥ ॥आराधयंतिसर्वेपिविष्णुंभक्तार्तिनाशनं॥यज्ञैर्दानैस्तथातीर्थैस्तपोभिश्चयथावि
धि॥विष्णुप्रीतिकरंतेषांविष्णुसान्निध्यकारकं॥यत्कृत्वातानिचीर्णानिसर्वाण्यपिभवंतिहि॥ ॥ग
णाऊचतुः॥ ॥साधुपृष्टंत्वयाविप्रशृणुष्वैकाग्रमानसः॥सेतिहासकथांविप्रकथ्यमानांपुराभवां॥ ॥२३॥
कांतिपुर्यांपुराचोलचक्रवर्तीनृपोभवत्॥यस्याभूद्येनतद्देशाश्चोलाइतिचकारिताः॥यस्मिन्शा
सतिभूचक्रंदरिद्रोवापिदुःखितः॥पापबुद्धिःसरुग्वापिनवैकश्चिदभून्नरः॥यस्यापनंतयज्ञस्यता

त्रपर्णाकृतदावुभौ॥ स्फुवर्णपूपैः शोभाढ्यावास्तांचैत्ररथोपमौ॥ सकदाचिद्रंगाद्राजा घ्यनंतनूयनंद्विज॥
यत्रासोजगतांनाथोयोगनिद्रामुपागते॥ तत्रश्रीरमणंदेवंसंपूज्यविधिवन्नृप॥ माणिमुक्ताफलैर्दि
व्यैःस्वर्णपुष्पैश्चशोभनैः॥ प्रणम्यदंडवद्भावदुपविष्टःसतत्रवै॥ तावद्ब्राह्मणमायांतंतुलस्युदक
पाणिनं॥ स्वपुरीवासिनंतत्रविष्णुदासाह्वयंद्विजं॥ तत्राभ्येत्यसविप्रर्षिर्देवदेवमपूजयत्॥ विष्णु
सूक्तेनसंप्रार्थ्यतुलसीमंजरीदलैः॥ तुलसीपूजयातस्यरत्नपूजांपुराकृतां॥ आच्छादितांसमालोक्य
राजाक्रुद्धोब्रवीद्द्विज॥ ॥राजोवाच॥ ॥माणिक्यस्वर्णादिपूजाशोभाढ्यायामयाकृता॥ विष्णुदास
कथंसेयंमाछिन्नातुलसीदलैः॥ विष्णुभक्तिंनजानासिवराकोसिमतोमम॥ यास्त्रिमामतिशोभाढ्यां
पूजामाछादयस्यहो॥ इतितद्वचनंश्रुत्वाचक्रोधःसद्विजोत्तमः॥ राज्ञोगौरवमुल्लंघ्यजगादवचनंत
दा॥ ॥विष्णुदासउवाच॥ ॥विष्णुदास्यंचवैजानासिचंचयोगवित्॥ किंचिद्विष्णुव्रतंपूर्वंत्वयाचीर्णं
वदस्वतत्॥ ॥गणाऊचतुः॥ ॥तद्ब्राह्मणवचःश्रुत्वाप्रहस्यसनृपोत्तमः॥ विष्णुदासंतदागर्वादुवा
चवचनंद्विजं॥ ॥राजोवाच॥ ॥इत्थंचेद्ददसेविप्रविष्णुभक्त्यातिगर्वितः॥ भक्तिस्तेकीयतीविप्रदरिद्रस्या

कार्त्ति०

धनस्यच।यज्ञदानादिकंचैवविष्णुतुष्टिकरंकृतं।।नापिदेवालयंपूर्वंकृतमस्तित्वयाक्वचित्।।ईदृशस्यापि
।।२४।। तेवासिएषावर्त्ततिभक्तितः।।तच्छृण्वंतुवचोमेद्यसर्वेप्येतेद्विजोत्तमाः।।साक्षात्कारमहंविष्णोरेषश्वोदोगमि
ष्यति।।पश्यंतिसर्वेपातित्तोभक्तिंज्ञास्यंतिचावयोः।। ।।गणाउचतुः।। ।।इत्युक्त्वासनृपोराजन्निजंराजगृ
हंद्विज।।आरेभेवैष्णवंसत्रंकृत्वावैरंतुतत्कृतं।।मुद्गलंऋषिसंघैस्तुसमाकृष्टयदीक्षितं।।यद्ब्रह्मणाकृ
तंपूर्वंगयाक्षेत्रेसमृद्धिमत्।।विष्णुदासोपितत्रैवतस्यदेवालयेव्रती।।पंचैतान्नियमान्कृत्वाविष्णुतुष्टि
करान्सदा।।माघेतथाव्रतंसम्यक्तुलसीवनपालनं।।एकादश्याव्रतंजापोद्वादशाक्षरविद्यया।।उप
चारैःषोडशाभिःगीतनृत्यादिमंगलैः।।नित्यंविष्णोस्तथापूजांव्रतान्येतानिसोकरोत्।।नित्यंचसंस्म
रन्विष्णुंगच्छन्भुंजन्स्वपन्नपि।।सर्वभूतास्थितंविष्णुंममन्यत्समदर्शनः।।माघकार्त्तिकयोर्नित्यंवि
शेषनियमानपि।।अकरोद्विष्णुतुष्ट्यर्थंसोद्यापनविधिंतथा।।एवंसमाराधयतोःश्रियःपतिस्तयो ।।२४।।
स्तुचोलेश्वरविष्णुदासयोः।।अगादहानाबहुवृत्तव्रतस्तयोस्तन्निष्ठसर्वेंद्रियकर्मणोरतेः।। ।।इतिश्री
पद्मपुराणेकार्त्तिकमाहात्म्येएकविंशोध्यायः।। ।।गणाउचतुः।।एकदाविष्णुदासोथकृत्वानित्यविधिं

द्विजः॥ पाकं कृत्वा च संस्थाप्य ययौ देवालयं द्विजः॥ तत्र कोप्यागतो लीनो हृत्वास्याकमलक्षितः॥ तमदृष्ट्वाप्य
सो पाकं पुनरेवाकरोत्तदा॥ सायंकालार्चनस्यासौ व्रतभंगभयाद्द्विजः॥ द्वितीयेन्हि ततः पाकं कृत्वा यावत्सवि
ष्णवे॥ उपहारार्चनं कर्तुं गतः कोप्यहरत्पुनः॥ एवं सप्तदिनं तस्य पाकं कोप्यहृत्ताद्विजः॥ संजायविस्मयः सो
थ मनस्येव विचारयन्॥ अहो नित्यं समभ्येत्य कः पाकं हरते मम॥ क्षेत्रसन्यासिना स्थानं नत्याज्यं मम सर्व
था॥ पुनः पाकं विधायैवं भुंजते यादि चेन्मया॥ सायंकालार्चनं चैव परित्याज्यं कथं भवेत्॥ यदि पाकं विधा
येव सायं कृत्वा पुनश्च तत्॥ अनिवेद्य हरे सर्वं विष्णवे नैव भक्षयेत्॥ उपोषितः कथं सोहं तिष्ठाम्यव्रतोत्थि
तः॥ असंरक्षणं सम्यक् पाकस्यात्र करोम्यहं॥ इति पाकं विधायासौ तत्रैवालक्षितः स्थितः॥ तावद्ददर्श चां
डालं पाकान्नहरणोस्थितं॥ क्षुत्क्षामदीनवदनमास्थिचर्मविनोषितं॥ तमालोक्य द्विजाग्र्यो भूत्कृपयावि
ष्टमानसः॥ विलोक्य तं हरंतं तु विप्रास्तिष्ठ तिष्ठेति धावत॥ कथमत्सि भवान् रूक्षं घृतमेतद्गृहाण भो॥ दृ
ष्ट्वैतं द्रुवतं विप्रमग्रेयांतं विलोक्य च॥ वेगाद्धावंस्तदा भीत्या मूर्छितः सपपात ह॥ भीतं संमूर्छितं दृष्ट्वा चांडा
लं सद्द्विजोत्तमः॥ वेगादभ्येत्य कृपया स्ववस्त्रांतेरवीजयत्॥ अथोत्थितं तमेवासौ विष्णुदासो व्यलोकयत्॥
सर्वसोन्नारायणं देवं शंखचक्रगदाधरं॥ पीतांबरं चतुर्बाहुं श्रीवत्सांकं किरीटिनं॥ अतसीपुष्पसंकाशं

कौस्तुभोरस्थलंविभुं॥तंदृष्ट्वासात्विकेर्भावैरावृतोद्विजसत्तमः॥स्तोतुंचापिनमस्कर्तुंतदानालंबभूवसः॥अथत्रा
॥२५॥ क्रादयोदेवास्तत्रैवाभ्याययुस्तदा॥गंधर्वाप्सरसश्चापिजगुश्चननृतुर्मुदा॥विमानशतसंकीर्णंदेवर्षिगणसं
कुलं॥गीतवादित्रनिर्घोषंस्थानंतदभवत्तदा॥ततोविष्णुःसमालिंग्यस्वभक्तंसात्विकव्रतं॥सारूप्यमात्मनो
दत्वानयद्वैकुंठमंदिरं॥विमानवरसंस्थंतंगछंतंविष्णुसन्निधिं॥दीक्षितश्चोलनृपतिर्विष्णुदासददर्शह॥
वैकुंठभवनंयांतंविष्णुदासंविलोक्यसः॥स्वगुरुंमुद्गलंवेगादाहूयेदंवचोब्रवीत्॥यस्यस्पर्धयामयाचेतद्य
ज्ञदानादिकंकृतं॥सविष्णुरूपधृग्विप्रोयातिवैकुंठमंदिरं॥दीक्षितेनमयासम्यक्सत्रेस्मिन्वैष्णवेमया॥
उत्तमग्नोकृताविप्रांदानाद्यैःपूर्णमानसः॥नैवाद्यापिसमेदेवःप्रसन्नोजायतेध्रुवं॥भक्त्यैवतस्यविप्र
स्यसाक्षात्कारंददौहरिः॥तस्माद्दानैश्चयज्ञैश्चनैवविष्णुःप्रसीदति॥भक्तिरेवपरंतस्यनिदानंदर्शनेविभोः॥
इत्युक्त्वाभागिनेयंस्वमभिषिंचंनृपासने॥आबाल्याद्दीक्षितोयज्ञेष्वपुत्रत्वमगाद्धृतः॥तस्माद्द्यापितद्देशे
सदाराज्यंतुभागिनः॥स्वात्मियाएवजायंतेतत्कृताविधिवर्तिनः॥यज्ञवाटंततोभ्येत्यवन्हिकुंडाग्रतःस्थि ॥२५॥
तः॥त्रिरुच्चैर्व्याजहाराथविष्णुंसंबोधयन्निव॥विष्णौभक्तिंस्थिरांदेहिमनोवाक्कायकर्मभिः॥इत्युक्त्वासोपतद्व
न्हौसर्वेषामेवपश्यतां॥मुद्गलस्तुतदाक्रोधाच्छिखामुत्पाट्यस्वकां॥ततस्त्वद्यापितद्गोत्रेमौद्गलाविशिखाबभुः॥

तावदाविर्भवद्विष्णुःकुंडाग्नेर्भक्तवत्सलः॥ तमालिंग्यविमानाग्र्यंसमारोह्यदयाकृतः॥ तमालिंग्यात्मसारूप्यं
ददौवैकुंठमंदिरं॥ तेनैवसहदेवेशोजगामात्रिदशावृतः॥ योविष्णुदासःसतुपुण्यशीलोयश्चोलभूपःसतुशी
लनामा॥ एतावुभौतत्समरूपभाजौद्वास्थौकृतौतेनरमाप्रियेण॥ ॥ इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येद्वाविं
शोध्यायः॥ ॥ धर्मदत्तउवाच॥ ॥ जयश्चविजयश्चैवविष्णोर्द्वास्थौश्रुतौमया॥ किंतुताभ्यांपुराचीर्णंयस्मात्तद्रू
पधारिणौ॥ ॥ गणाऊचतुः॥ ॥ तृणबिंदोस्तुकन्यायांदेवहूत्यांपुराद्विज॥ कर्दमस्यचदृष्ट्यैवद्वौपुत्रौसंबभू
वतुः॥ ज्येष्ठोजयःकनिष्ठोभूद्विजयश्चेतिनामतः॥ तस्यामेवाभवत्पश्चात्कपिलोयोगधर्मवित्॥ जयश्च
विजयश्चैवविष्णुभक्तिरतौसदा॥ सान्निध्यमिंद्रियग्रामंधर्मशीलौबभूवतुः॥ नित्यमष्टाक्षरीजाप्यौविष्णुव्रत
परावुभौ॥ साक्षात्कारंददौविष्णुर्ययोर्नित्यार्चनेसदा॥ मरुत्तेनकदाचित्तावाहूतौयज्ञकर्मणि॥ जग्मतुर्यज्ञकु
शलौदेवर्षिगणसेवितौ॥ जयस्तत्राभवद्ब्रह्मायाजकोविजयोभवत्॥ ततोयज्ञविधिंकृत्स्नंपरिपूर्णंप्रचक्रतुः॥
मरुत्तोवभृथस्नातस्ताभ्यांवित्तंददौबहु॥ तत्समादायतौवित्तंजग्मतुःस्वाश्रमंप्रति॥ यजनायतदाविष्णोस्तत्क्ष
र्थंतौतदामुनी॥ तद्धनंविभजंतौचपस्पर्द्धातेपरस्परं॥ जयोब्रवीत्समोभागःक्रियतामितितत्रसः॥ विजयश्चाब्र
वीत्तत्रयल्लब्धंयेनतस्यतत्॥ ततोशपज्जयंक्रोधाद्विजयःक्षुब्धमानसः॥ वित्तंगृहीत्वानददास्येतत्तस्माद्ग्रा
होभवेतितं॥ विजयस्तस्यतंशापंश्रुत्वासोप्यशपच्चतं॥ मदभ्रांतोयतस्त्वंमातस्मान्मातंगतांव्रज॥ तत्तदाच

स्यतुर्विष्णुंदृष्ट्वानित्यार्चनेविभुं॥शापयोस्त्वांनिवृत्तिंतौययाचातेरमापतिं॥ ॥जयविजयवूचतुः॥ ॥भक्तावा
॥२६॥ वांकथंदेवग्राहमातंगयोनिगौ॥भविष्यावःकृपासिंधोतत्त्वापोविनिवर्त्तिनां॥ ॥भगवानुवाच॥ ॥मद्भक्तयो
र्वचोसत्यंनकदाचिद्भविष्यति॥मयापिनान्यथाकर्त्तुंशक्यतेनकदाचन॥प्रह्लादवचसास्तंभेह्याविर्भूतोह्यहं
पुरा॥तथांबरीषवाक्येनजातोलोकेप्यहंकिल॥तस्माद्भवामिभोशापावनुभूयस्वयंकृतौ॥लभेतांयत्पदं
नित्यमित्युक्त्वांतर्दधेहरिः॥ततस्तौग्राहमातंगावभूतांगंडकीतटे॥जातिस्मरौतुतद्योन्यामपिविष्णुव्रतेस्थितौ॥
कदाचित्सगजोस्नातुंकार्त्तिकेगंडकीतटं॥तावज्जग्राहतंग्राहःसंस्मरन्शापकारणं॥ग्राहग्रहीतोसोनागः
सस्मारश्रीपतिंतदा॥तावदाविर्भवद्विष्णुःशंखचक्रगदाधरः॥ततस्तौग्राहमातंगौचक्रक्षिप्तावमुंसधृतौ॥
दत्वाचनिजसारूप्यंवैकुंठमनयद्विभुः॥तदाप्रभृतितत्स्थानंहरिक्षेत्रमितिस्मृतं॥चक्रसंघर्षवात्त्रास्मिन्
ग्रावाणोपिहिलांछिताः॥ताविमौविश्रुतौलोकेजयश्चविजयश्चह॥नित्यंविष्णुप्रियौद्वास्स्थौपृष्ठौयोहित
तदाद्विज॥अतस्त्वमपिधर्मज्ञनित्यंविष्णुपदेस्थितः॥यत्कर्मात्स्पर्शभावोपिभवस्वसमदर्शनः॥तुलामक
रमासेषुप्रातःस्नायीसदाभवेत्॥एकादशीव्रतेतिष्ठन्तुलसीवनपालकः॥ब्राह्मणानपिगाश्चैवापिवैष्णवांश्च
सदाभज॥मसूरिकानारनालंवृंताकानपिखादमां॥एवंत्वमपिदेहांतेतद्विष्णोःपरमंपदं॥प्राप्नोषिधर्म ॥२६॥
दत्वांतेतद्व्रतेवतुयथावयं॥तवाजन्मव्रतात्तस्माद्विष्णुसंतुष्टिकारकात्॥नयसानचदानानिनतीर्थानिधि

कान्विते। धन्योसि विप्राग्र्य यतस्त्वयैतद्व्रतं कृतं तुष्टिकरं जगद्गुरोः॥ यदर्धभागास्य फलं मुरारेः प्रणीयते त्वा
भिरियं सलोकता॥ ॥नारद उवाच॥ इत्युक्त्वा तौ धर्मदत्तं तेमुपादिन्य विमानगौ॥ तयाकलहया सार्धं वैकुंठभु
वनं गतौ॥ धर्मदत्तोप्यसौ जातः प्रस्पष्टं तद्व्रतोस्थितः॥ देहांते तद्द्विभोस्थानं भार्याभ्यामन्वितोभ्ययात्॥ ॥इति
हासपुराणमिमं भवं शृणुते यश्च पुरा न पठन्नापि॥ हरिसान्निधिकारिणीं मतिं लभते सोकृपया जगद्गुरोः॥ ॥
इति श्री पद्मपुराणे कार्तिकमाहात्म्ये त्रयोविंशोध्यायः॥ ॥पृथुरुवाच॥ ॥कृष्णवेण्यो त्वनदद्यस्माद्धिवविष्णु
गणेः पुरा॥ वर्णिकुत्रा रीरकलहानिर्गता कथिता त्वया॥ प्रभावोयं तयोर्नद्योः किं वा क्षेत्रस्य तत्स्य वा॥ तन्मे
कथय धर्मज्ञ विस्मयोत्र महान्हि मे॥ ॥नारद उवाच॥ ॥कृष्णा कृष्णतनुः साक्षाद्वेण्या देवो महेश्वरः॥ तत्संगमप्र
भावं तु नालं वक्तुं चतुर्मुखः॥ तथापि तत्समुत्पत्तिं कीर्तयिष्यामि तां शृणु॥ चाक्षुषस्यांतरे पूर्वं मनोर्देवः पितामहः
सिंह्याद्रिगिरिखरे रम्ये यजनायोद्यतोभवत्॥ सकृत्वा यज्ञसंभारान्सर्वदेवगणैर्वृतः॥ फक्नोहरिहराभ्यां चेत
द्गिरेः गिरिखरं ययौ॥ भृग्वादयो मुनिगणा मुहूर्ते ब्रह्मदैवते॥ तस्य दीक्षाविधानाय समाजं तत्र चक्रिरे॥ अ
थज्येष्ठां स्वरापत्नीं विष्णुरावाहयत्तदा॥ सात्रानोरातयोत्तत्र भृगुर्विष्णुमुखाचह॥ ॥भृगुरुवाच॥ ॥वि
ष्णोस्वरास्त्वया हूता याप्याथातिना हिसिचरं॥ मद्दूर्त्तोतिक्रमश्चैष कार्योदीक्षाविधिः कथं॥ ॥विष्णुरुवाच॥ ॥

नायातिचेत्स्वरान्नूनंगायत्र्यत्रविधीयतां।।एषापिनभवेदस्यभार्याकिंपुण्यकर्मणि।। ।।नारदउवाच।। ।।एवमे
।।२७।। वदहिरुद्रोपिविष्णोर्वाक्यमनोदधत्।।तच्छ्रुत्वातद्रुद्रवाक्यंगायत्रींब्रह्मपार्श्वतदा।।निवेश्यदक्षिणेभागेदीक्षाविधि
मथाकरोत्।।यावद्दीक्षाविधिस्तस्यविधेश्चक्रुर्मुनीश्वराः।।तावदभ्याययौतत्रस्वरायज्ञस्थलेनृप।।ततस्तां
दीक्षितांदृष्ट्वागायत्रींब्रह्मणासह।।सापत्न्येर्ष्यापराक्रोधात्स्वरावचनमब्रवीत्।। ।।स्वरोवाच।। ।।अपूज्याय
त्रपूज्यंतेपूज्यानांचव्यतिक्रमः।।त्रीणितत्रभविष्यंतिह्यनिमित्तस्तथासवे।।दुर्भिक्षंमरणंभयमितिपा
ठः।।मदासनेविनिष्टेयंभवद्भिःसन्निवेशिता।।तस्मात्सर्वेजडीभूतानदीरूपाभविष्यथ।।इयंचदक्षिणेभा
गेत्रूपविष्टामदासने।।तस्माल्लोकेसदादृश्यास्तनुरूपास्तुनिम्नगाः।।ततस्तच्छापमाकर्ण्यगायत्रीकं
पिताधरा।।सखुच्छापान्नापदेववार्थमापापितांस्वरां।। ।।गायत्र्युवाच।। ।।तवभर्त्तायथाब्रह्माममसाप्ये
षतथाखलु।।यथान्नापस्त्वंयस्मान्मांभवत्वमपिनिम्नगा।। ।।नारदउवाच।। ।।ततोहाहाकृताःसर्वेविन्नी
वविष्णुमुखाःसुराः।।प्रणम्यदंडवद्भूमौस्वरांतत्रविजिज्ञपुः।। ।।देवाऊचुः।। ।।देविसर्वैर्वयंनूनंब्र ।।२७।।
ह्मायायेस्वयाशुभा।।यदिसर्वेजडीभूताःभविष्यामोत्रनिम्नगाः।।तदलोकत्रयंध्वस्तंद्विनाशीष्यातिनिश्चितं।।
अविवेकःकृतस्तस्माच्छापोयंविनिवर्त्यतां।। ।।स्वरोवाच।। ।।नार्चितोहिगणाध्यक्षोयज्ञादौयत्कृतोत्तमाः।।

तस्माद्विघ्नंसमुत्पन्नंमत्क्रोधजमदंखलु॥नापिमद्वचनंधृतेतदसत्यंखलुजायते॥तस्मात्त्वांत्राजडीभूताय्
यंभवथनिम्नगाः॥आवामपिसपत्न्यौचत्वांत्राममपिचनिम्नगे॥भविष्यावोऽत्रवैदेवाःपश्चिमाभिमुखावहः॥
॥नारदउवाच॥इतितद्वचनंश्रुत्वाब्रह्माविष्णुमहेश्वरः॥जडीभूताभवन्नद्यःस्वराचैवततदान्नृप॥विष्णुस्त
त्राभवत्कृष्णावेण्यादेवोमहेश्वरः॥ब्रह्माककुद्मिनीचापिपृथक्चैवाभवत्तदा॥देवास्तानपितान्त्वांत्रान्
जडीकृत्वाविचिक्षिपुः॥सह्याद्रिशिखरेभ्यस्ताःपृथगासःस्मनिम्नगाः॥देवांशैःपूर्ववाहिन्योबभूवुः
पश्चिमावहेः॥पत्न्योंशौपृथक्कृत्वात्रजातत्रांशोथसहस्त्रयाः॥गायत्रीचस्वराचैवपश्चिमाभिमुखेतदा॥येवेना
भवतांनद्यौसावित्रीतिप्रथांगते॥ब्रह्मणास्थापितेतत्रयज्ञेहरिहरावुभौ॥महाबलातिबलिनौनाम्नादेवौबभूव
तुः॥तयोर्नद्योस्तुमाहात्म्यंमाहेवक्तुंक्षमोनृप॥यत्रब्रह्मादयोदेवास्त्वांत्रोत्तिष्ठन्तिचापगाः॥कृष्णोद्भवंपापह
रंपरंयःशृणोतिप्रश्रावयत्तेचभक्त्या॥स्यात्तस्यःपुंसःसकलेष्टार्थदर्शनंपुण्यंतथागांगसमुद्भवंस्मृतं॥ ॥
॥इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येचतुर्विंशोध्यायः॥ ॥श्रीकृष्णउवाच॥ ॥इतितद्वचनंश्रुत्वापृथकर्विस्मि
तमानः॥संपूज्यनारदंभक्त्याविससर्जतदाप्रिये॥तस्माद्व्रतत्रयंप्रोक्तंममात्तीवप्रियंकरं॥माघकार्त्तिकयो
स्तद्वत्तथैवैकादशीव्रतं॥वनस्पतीनांतुलसीमासानांकार्त्तिकप्रियः॥एकादशीतिथीनांचक्षेत्राणांद्वारकामम॥

॥२८॥ एतेषांसेवनंयस्तुकरोतिनियतेंद्रियः॥समेवलभतांयातितथानयजनादिभिः॥पापेभ्योनभयंतेनकर्त्त
व्यंनियमादपि॥एतेषांसेवनंकांतेकुर्वतांमत्प्रसादतः॥ ॥सत्यभामोवाच॥ ॥विस्मापनीत्वन्नाथय
त्वयाकथितंमम॥परदत्तेनपुण्येनकलहामुक्तिमागता॥इत्थंप्रभावोसासोयंकार्त्तिकस्तुप्रियंकरः॥
स्वामिद्रोहादिपापानिस्नानपुण्यैर्गतानियत्॥दत्तेंचलभतेपुण्यंयस्यरेणाकृतंविभो॥अदत्तंकेन
मार्गेणलभतेवानवेतिच॥ ॥श्रीकृष्णउवाच॥ ॥अदत्तान्यपिपुण्यानिपापानिचयथानरः॥प्राप्यंतेके
येनतत्तथावन्निन्नामय॥देशग्रामकुलाभिस्तुभागभांजिकृतादिषु॥कलौतुकेवलंकर्त्ताफलभुक्पा
पपुण्ययोः॥अकृतेपिहितंसर्वंव्यवस्थेयमुदाहृता॥संसर्गात्पुण्यपापानियथायांतिनिबोधतत्॥
एकत्रमैथुनाध्यानादेकंपात्रस्थभोजनात्॥फलार्धंप्राप्नुयान्मर्त्योयथावत्पुण्यपापयोः॥अध्याप
नाद्याजनाद्वापिचैकपंक्तिग्राशनादपि॥तुर्यंशंपुण्यपापानांपरोक्षंलभतेनरः॥एकासनादेकयानानि
श्वासादेकसंगतः॥षडंशंग्रांशेनभागीस्यान्नियतंपापपुण्ययोः॥स्पर्शनाद्भाषणाद्वापिपरस्यस्त ॥२८॥
वनादपि॥दशांशंपुण्यपापानांनित्यंप्राप्नोतिमानवः॥दर्शनश्रवणाभ्यांचमनोध्यानाच्चकीर्त्तना
त्॥परस्यपुण्यपापानांशतांशंप्राप्नुयान्नरः॥परस्यनिंदापैशून्यंधिक्कारंचकरोतियः॥तत्कृतंपातकं

प्राप्यस्वपुण्यंचददातिसः॥ कुर्वतःपुण्यपापानिसेवांयःकुरुतेनरः॥ पत्नीभृत्तकशिष्येभ्योयदन्यः
कोपिमानवः॥ तस्यमेवानुरूपंचेद्द्रव्यंकिंचिनविधत्ते॥ सोपिसेवानुरूपेणतत्पुण्यंफलभाग्भवेत्॥
एवंपंचत्रयश्चतोयस्तुलंघयेत्परिवेषयेत्॥ तस्यपुण्यषडंशेनलभतेयस्तुलंघितः॥ स्नानसंध्या
जपंकुर्वन्संस्पृष्टस्तंचभाषते॥ तत्पुण्यकर्मषष्ठांशंतस्मैदद्यादितिश्रुतं॥ धर्मोद्देशेनयोद्रव्यंया
चतेहिपरंनरः॥ तत्पुण्यकर्मजंतस्यधनदःप्राप्नुयात्फलं॥ अपहृत्यपरद्रव्यंपुण्यकर्मकरोतियः॥
कर्मकृत्पापभाक्तत्रधनिनस्तत्रवैद्धेफलं॥ नापनुपस्यऋणंयस्तुपरस्यम्रियतेनरः॥ धनीतत्पु
ण्यमादत्तेस्वधनस्यानुरूपतः॥ बुद्धिदश्चानुमंताचयश्चोपकरणप्रदः॥ बलदश्चापिषष्ठांशंप्रा
प्नुयात्पुण्यपापयोः॥ प्रजाभ्यःपुण्यपापानांराजाषष्ठांशमुद्धरेत्॥ शिष्याद्गुरुःस्त्रियोभर्तापिता
पुत्रस्तथैवच॥ स्वापितरेपिपुण्यस्ययोषिदर्द्धांशमाप्नुयात्॥ चित्तस्यानुव्रतायाश्चदत्तेतेतुष्टिका
रिणी॥ परहस्तेनदानानिकुर्वतःपापकर्मपाः॥ विनाभृतकपुत्राभ्यांकर्त्ताषष्ठांशमुद्धरेत्॥ वृत्तिदो
वृत्तिसंभोक्तुःपुण्यंषष्ठांशमाहरेत्॥ आत्मनोवापरस्यापियदिसेवांनकारयेत्॥ तस्याहिपुण्यष

ष्टां सल्लभते नात्र संशयः ।। इत्थं घृतदानान्यपि पुण्यपापानि नयंति नित्यं परसंचितानि शृणुष्व चास्मिन्नि
।।२९।। तिहासमग्र्यं पुराभवं पुण्यमतिप्रदं च ।। ।।इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये पंचविंशोऽध्यायः ।।
।। श्रीकृष्ण उवाच ।। ।।पुरावंतिपुरवासी विप्र आसीद्धनेश्वरः ।। ब्रह्मकर्मपरिभ्रष्टः पापनिष्ठः
स दुर्मतिः ।। स कंबलं चर्माद्यैः स सत्यानृतवर्त्तकः ।। स्तेयवेश्यास्पर्शनद्यूतसंसक्तमानसः ।। देशा पा
द्देशांतरं गच्छन्क्रयविक्रयकारणात् ।। माहिष्मतीं पुरीं मागात्कदाचित्स धनेश्वरः ।। माहिषेण कृता
पूर्वं तस्मान्माहिष्मती हि सा ।। तस्यां वै प्रगता भाति नर्मदा पापनाशनी ।। कार्त्तिकव्रतिनस्तत्र नाना
ग्रामान्समागतान्नरान् ।। स ददर्श च विक्रेयं कुर्वन्मासमेकमुवास ह ।। स नित्यं नर्मदातीरे भ्रमन्विक्रयकार
णात् ।। ददर्श ब्राह्मणान्स्नानजपदेवार्चने रतान् ।। कांश्चित्पुराणं पठतः कांश्चिच्च श्रवणे रतान् ।। नृत्य
गायनवादित्रविष्णुस्तवनतत्परान् ।। विष्णुमुद्रांकितान्कांश्चिन्मालातुलसिधारिणः ।। ददर्श कौतुका ।।२९।।
विष्टस्तत्र तत्र धनेश्वरः ।। नित्यं परिभ्रमंस्तत्र दर्शनस्पर्शभाषणात् ।। वैष्णवानां तथा विष्णोर्नाम[illegible] सं
श्रवणं लभत् ।। एवं मासं स्थितः सोऽयं कार्त्तिकोद्यापनाविधिः ।। क्रियमाणं ददर्शासौ भक्तैर्जागरणं हरेः ।।

पौर्णमास्यांततोयद्वद्द्विप्राणांपूजनंहरेः॥दक्षिणाभोजनाद्यंचदीयमानंप्रतापितेः॥ततोकौस्त्तमपयेचैव
दीपोत्सवविधिंतदा॥क्रियमाणंददर्शासोप्रस्यर्थंत्रिपुरद्विषः॥त्रिपुराणांकृतोदाहोयतस्तस्यांत्रिवेनतु॥
अतस्तत्क्रियतेतस्यांतिथौभक्तैर्महोत्सवः॥ममरुद्रस्ययःकश्चिदंतरंपरिकल्पयेत्॥तस्यपुण्यक्रियाः
सर्वाःनिःफलास्युर्नसंशयः॥तत्रनृत्यादिकंपश्यंबभ्रामसधनेश्वरः॥तावत्कृष्णाहिनादष्टोविह्वलःसम
पात्तसः॥जनास्तंपतितंवीक्ष्यपरिवव्रुःकृपान्विताः॥तुलसीमिश्रितैस्तोयैस्तन्मुखंसिषिचुस्तदा॥अथ
देहंपरित्यक्तंबध्वायमकिंकराः॥बध्यमानंकशाघातैर्निन्युःसंयमनींरुषा॥चित्रगुप्तस्ततंदृष्ट्वानि
र्भर्त्स्यावेदयत्तदा॥यमायतेनबालत्वात्कर्मयद्दुःकृतंकृतं॥ ॥चित्रगुप्तउवाच॥ ॥नैवास्यदृश्यतेकिंचिदा
बाल्यात्सुकृतंकृतं॥दुष्कृतंनाकृतंतेनवसुंवर्षेणापिचभास्करे॥पापबुद्धिःपरंदुष्टकेवलंदृश्यतेविभो॥तस्मा
दाकल्पमर्यादंनिरयेपरिकल्प्यतां॥ ॥श्रीकृष्णउवाच॥ ॥निशम्येतिवचःक्रोधाद्यमःप्राहस्वकिंकरान्॥
दर्शयन्नात्मनोरूपंकालाग्निसदृशंप्रभुः॥ ॥यमउवाच॥भोप्रेतानयस्वैनंबध्यमानंस्वमुद्गरैः॥कुंभी
पाकेचसंक्षिप्तातैलेक्वथितेनाक्षिप्ते॥यावत्क्षिप्तस्ततत्रासौतावच्छीतलतांययौ॥कुंभेपाकेयथावह्निःप्र

॥३०॥ ह्रादक्षेपणासुरा ॥ तं दृष्ट्वा महदाश्चर्यं प्रेतपो विस्मयान्वितः । वेगादागत्य तत्सर्वं यमायावेदयत्तदा ॥ यमस्तत्कौ
तुकं श्रुत्वा प्रेतपेन निवेदितं । आः किमेतदिति प्रोक्त्वा तमानीय विचारयत् । तावदभ्यागतस्तत्र नारदः प्राह
सत्वरं । यमेन पूजितः सम्यक् तं दृष्ट्वा वाक्यमब्रवीत् ॥ ॥ नारद उवाच ॥ ॥ नैवायं निरयो भोक्तुं क्षमस्त्व
पितृनंदन । सम्यग्गतस्य संजातं कर्म यन्निरयापहं । यः पुण्यकर्मिणां कुर्याद्दर्शनस्पर्शभाषणां । तत्षडं
शमवाप्नोति पुण्यस्य नियतं नरः ॥ भाषणं दर्शनं संसर्गो धृतवानेष यद्द्विजः ॥ कार्त्तिकव्रतिभिर्मासं तस्य पु
ण्यं त्रिभागयोः ॥ परिचर्याकरः षष्ठांशं संपूर्णव्रतपुण्यभाक् ॥ अतोस्याजवतो दूरतपुण्यसंख्यानविद्य
ते ॥ कार्त्तिकव्रतिनां मासा सायंतकानि महांत्यपि । प्रदहेदात्म महसा विष्णुः सद्भक्तवत्सलः ॥ अंते च नार्म
दस्तोये तुलसीमिश्रितेस्वयं । वैष्णवैः स्थापितो विष्णोर्नाम संश्राविद्य न्यतः ॥ तस्मान्निहतपापोपि सद्गतिं
प्राप्तुमर्हति । वैष्णवानुग्रहीयस्मान्निरयेनावपच्यते । आर्द्रशुष्के यथा पापैर्निरये भाग संनिधिः ॥ प्राप्य ॥३०॥
तेस्फलते स्तद स्वर्गस्तत्संनिधिस्तथा । तस्मादकामपुण्योसौ यस्य योनिस्थितस्स्वयं । विलोक्य निरयान्स
र्वान्पापभोगप्रदर्शकान् ॥ ॥ श्रीभगवानुवाच ॥ ॥ इत्युक्त्वा गतवति नारदे ससौरिस्तद्वाक्यश्रवणाविबोध

जस्त्वकर्मा॥तंविप्रंपुनरनयत्तस्यकिंकरैस्तान्सर्वान्निरयगणान्प्रदर्शयिष्यन्॥ ॥इतिश्रीपद्मपुराणेका
र्तिकमाहात्म्येषड्विंशोध्यायः॥ ॥श्रीकृष्णउवाच॥ ॥ततोधनेश्वरंनत्वानिरयान्प्रेतपोब्रवीत्॥प्रदर्शयिष्यस्ता
न्सर्वान्यमस्याज्ञकरस्तदा॥ ॥प्रेतपउवाच॥ ॥पश्येमान्निरयान्घोरान्धनेश्वरमहाभयान्॥येषुपापकरानियं
पच्यंतेयमकिंकरैः॥तप्तवालुकनामायंनिरयोघोरदर्शनः॥यस्मिन्नेतेदग्धदेहाःक्रंदंतिपापकारिणः॥अतिथी
न्वैश्वदेवांतेक्षुत्क्षामानागतान्नयं॥पूजयंतितानेतेहिपच्यंतेस्वेनकर्मणा॥गुर्वग्निब्राह्मणानांश्चदेवान्मूर्धाभि
षिक्तकान्॥ताडयंतिपदायेवैनिर्दयाप्राणिनास्त्विमे॥षड्भेदस्त्वेषनिरयोनानापापैःप्रपच्यते॥तथैवांधतामि
स्रोयंद्वितीयोयंतमोमहान्॥यत्रसूचीमुखैर्देहाभिद्यंतेपापकर्मिणां॥क्रिमिभिर्घोरवक्त्रैश्चतमोत्थैर्यामेद्धि
ज॥असावपिस्थितःषोडाश्वकाकमृगपक्षिभिः॥परमर्मभिदोमर्त्याःपच्यंतेयेषुपापिनः॥तृतीयःक्रकचो
ह्येषनिरयोघोरदर्शनः॥यत्रैमेक्रकचैर्मर्त्याःपच्यंतेपापकर्मिणः॥असिपत्रवनाद्यंत्तुखड्गकातोप्ययंस्थितः॥
ततःपुत्रादिभिर्येवैवियोगंप्रापयंतिहि॥दुर्लभमन्यैरपिपरापच्यंतेदृह्त्तेनराः॥असिपत्रैश्छेद्यमानावृकभी
त्यापलायिनः॥पच्यंतेपापिनःपश्यक्रंदमानाइतस्ततः॥अर्गलाख्योमहाघोरश्चचतुर्थोनिरयोह्ययं॥यत्रना
नाविधैःपाशैर्बध्यंतेयमकिंकरैः॥मुद्गराद्यैर्बध्यमानैःक्रंदंत्येतेतुपापिनः॥सज्जनान्ब्राह्मणान्गांश्चनि

रुध्यंतीह्यनेनराः॥करग्रहाद्यैस्तेपापाः पच्यंतेयमकिंकरैः॥असावपिहिषड्भेदोवधबंधादिभिःस्थितः॥कूटशाल्म
॥३१॥ लिनामायांनिरयंपश्यपंचमं॥यत्रांगारनिभाद्येतेशाल्मलाधास्थितांद्विज॥यत्रघोराधिपच्यंतेयातनाभिरिमेनराः॥
परदारपरद्रव्यपरद्रोहरताःसदा॥रक्तपूयमिमंपश्यषष्ठंनिरयमद्भुतं॥अधोमुखाविपच्यंतेयत्रपापकृतोनराः॥
अभक्ष्यभक्षकानिंदापैशून्याभिरताश्चमे॥मज्जमानाबध्यमानाः क्रंदंतेरौरवान्नवान्॥षट्प्रकारोविगंधाद्यैरसा
वपिहिसंस्थितः॥कुंभीपाकःसप्तमोयंनिरयोघोरदर्शनः॥बहुतैलादिभिर्द्रव्यैर्धनेश्वरावलोकय॥महापातकिनो
यत्रपच्यंतेयमकिंकरैः॥बहून्यब्दसहस्राणिउन्मज्जननिमज्जनैः॥चत्वारिंशाप्रवर्तानेतान्व्याधिकान्पश्यरौरवा
न्॥अकामात्पातकंशुष्कंकामादार्द्रमुदाहृतं॥आर्द्रशुष्कादिभिःपापैर्द्विःप्रकारानवस्थितान्॥चतुरासीतिसंख्या
कैःपृथक्भेदैरवस्थितान्॥यत्संकीर्णमपांक्तेयंमलिनीकरणंतथा॥जातिभ्रंशकरंतद्वदुपपातकसंज्ञकं॥अतिपा
पमहापापंसप्तधापातकंस्मृतं॥एभिःसप्तरूपच्यंनिरयेषुयथाक्रमं॥कार्त्तिकव्रतिभिर्यस्मात्संसर्गोपिह
भवत्तव॥तत्पुण्योपचयादेतेनिर्मुक्तानिरयाःखलु॥ ॥श्रीकृष्णउवाच॥ ॥दर्शयित्वेतिनिरयान्प्रेतपस्तमथाब्र ॥३१॥
वीत्॥धनेश्वरंयक्षलोकंगच्छत्वंद्विजपुंगव॥धनेदस्यानुगःसोभूत्सधनयक्षेतिविश्रुतः॥यदाख्योयाकरोत्ती
र्थमयोध्यायांतुगाधिजः॥एवंप्रभावःखलुकार्त्तिकोमुक्तिप्रदोमुक्तिकरश्चयस्मात्॥प्रयांतिकांतेगतपातका

स्थितस्यसंदर्शनतोपिमुक्तिः॥ ॥इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येसप्तविंशोध्यायः॥ ॥सूतउवाच॥ ॥इत्युक्त्वा
वासुदेवोपिसत्यभामामितिप्रियां॥सायंसंध्यादिकंकर्तुंजगाममजननीगृहं॥एवंप्रभावःप्रोक्तोयंकार्त्तिकःपापना
शनः॥विष्णुप्रीतिकरोनित्यंभुक्तिमुक्तिकरप्रदः॥हरिजागरणंप्रातःस्नानंतुलसिसेवनं॥उद्यापनंदीपदानंव्र
तान्येतानिकार्त्तिके॥पंचकैर्व्रतकैरेभिःसंपूर्णंकार्त्तिकव्रती॥फलमाप्नोतियत्प्रोक्तंभुक्तिमुक्तिफलप्रदं॥ ॥ऋष
यऊचुः॥ ॥विष्णुप्रियोतिफलदोलयःप्रोक्तोरोमहर्षणः॥कार्त्तिकस्यविधिंसम्यक्सेतिहासेतिविश्रुतः॥अ
वश्यमेवकर्त्तव्यःपापदुःखविनाशहेतुः॥फलार्थिभिर्नरैःसम्यक्भोगदानैस्तथापिवा॥एवंस्थितेयदाकश्चिद्द्व
तस्थःसंकटेस्थितः॥दुर्गारण्यास्थितोवापिव्याधिभिःपरिपीडितः॥कथंतेनप्रकर्त्तव्यंकार्त्तिकव्रतकंशुभं॥
यस्मादत्यंतफलदमस्याद्यंसर्वदानरैः॥ ॥सूतउवाच॥ ॥एवमापद्गतोयस्तुनरोनित्यंदृढव्रतः॥का
र्त्तिकस्यव्रतंतेनकर्त्तव्यंतुयथाभवेत्॥तत्सर्वंकथयिष्येहंशृणुध्वंमुनिसत्तमाः॥विष्णोर्नैवस्ययाकुर्या
दालयेहरिजागरं॥शिवालयेविष्णुगृहाभावेसर्वदेवालयेपिवा॥दुर्गारण्यस्थितोयस्तुयदिवापद्गतोपिसन्॥कुर्यात्तदा
श्वत्थमूलेतुलसीवालयेतथा॥विष्णुनामप्रबंधानांगायनाद्विष्णुसंनिधौ॥गोसहस्रस्यप्रदानस्यफलंप्रा
प्नोतिमानवः॥वाद्यकृत्पुरुषश्चापिवाजपेयफलंलभेत्॥सर्वतीर्थावगाहोत्थंनर्त्तनैःफलमाप्नुयात्॥
सर्वमेतल्लभेत्पुण्यंतेषांतुद्रव्यदःपुमान्॥श्रावसंदर्शनाभ्यांहित्तच्छोदांशमवाप्नुयात्॥आपद्गतोयदाप्यंभो

नलभेत्सवनायाहि॥ व्याधितोवापुमान्कुर्याद्विष्णोर्नामापमार्जनं॥ उद्यापनविधिंकर्त्तुमशक्तोयोव्रतीस्थितः॥ ब्रा
ह्मणान्भोजयेच्छक्त्याव्रतसंपूर्णहेतवे॥ अव्यक्तरूपिणोविष्णोः स्वरूपंब्रह्मणाभुवि॥ यस्तुष्टस्सतुसंतुष्टःसर्वं
दद्यान्नसंशयः॥ अशक्तोदीपदानायपरदीपंप्रबोधयेत्॥ वातादिभ्यःप्रयत्नेनकुर्याद्दीपस्यलक्षणं॥ अभावेतु
लसीनांचपूजयेद्वैष्णवंद्विजं॥ यस्मात्संनिहितोनित्यंविष्णुभक्तेषुसर्वदा॥ सर्वाभावेव्रतीकुर्याद्ब्राह्मणानांगवामपि॥
सेवांवाबोधिनःकुर्यात्व्रतसंपूर्त्तिहेतवे॥ ॥ऋषयऊचुः॥ कथंत्वयाबोधिवटौब्राह्मणोश्वसमाकृतौ॥ सर्वे
भ्यश्चतरुभ्यश्चविप्रोषासूज्यतेकथां॥ सूतउवाच॥ ॥अश्वत्थरूपीभगवान्विष्णुरेवनसंशयः॥ रुद्ररूपोवटस्त
स्यपलाशोब्रह्मरूपधृक्॥ दर्शनंस्पर्शनंसेवातेषांपापहरास्मृता॥ स्करवायव्याधिकष्टानांध्रुवंवैनाशकारिणी॥
॥ऋषयऊचुः॥ ॥कस्माद्वृक्षत्वमापन्नाब्रह्मविष्णुमहेश्वराः॥ एतत्कथयधर्मज्ञसंशयोयंमहान्हिनः॥ ॥सूतउवाच॥
॥पार्वतीशिवयोर्देवैःस्मरतंकुर्वतोकिल॥ अग्निर्ब्राह्मणरूपेणर्ष्यप्रेरितोविघ्नंकृतंपुरा॥ ततस्तुपार्वतीक्रुद्धाशशा
पत्रिदिवौकसः॥ रतोद्भवसुखभ्रंशात्कंपमानारुषातदा॥ ॥पार्वत्युवाच॥ ॥कृमिकीटादयःसर्वेजानंति
सुरतेसुखं॥ तद्विघ्नाद्देवाःवृक्षत्वमवाप्स्यथ॥ ॥सूतउवाच॥ ॥एवंसापार्वतीदेवान्शशापक्रुद्धमान
सा॥ तस्माद्वृक्षत्वमापन्नाःसर्वेदेवगणाःकिल॥ तस्मादिमौविष्णुमहेश्वरावुभौबभूवतुर्बोधिवटौमुनीश्वराः॥
बोधिस्त्वगार्दर्कदिनंविनैवनस्पृश्यतामर्कसदृष्टियोगात्॥ ॥इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येअष्टावि

ऽध्यायः॥ ॥ऋषयऊचुः॥ ॥अस्पृश्यतां कथं याता सूत बोधितकस्त्वया॥ स्पृश्यत्वं च कथं याता तत्तथा चन्द्रानिशा
मरे॥ ॥सूतउवाच॥ ॥समुद्रमथनाद्यानि रत्नाद्यास न्मुनीश्वराः॥ श्रियं च कौस्तुभं चैव विष्णवे ददु सुराः॥ यावद्
॥ चकार सो लक्ष्मीं भार्यार्थमात्मनः॥ तावद्विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनं॥ ॥लक्ष्मीरुवाच॥ ॥असत्कृ
त्यं द्विजश्रेष्ठां कनिष्ठां परिणीयते॥ तस्मान्ममाग्रजामेतामलक्ष्मीं मधुसूदन॥ विवाहनयमापश्चाद्येष धर्मः
सनातनः॥ इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः॥ उद्दालकाय मुनये सददौ पसे तदा॥ आप्तवाक्यानुरोधे
न तामलक्ष्मीं ददौ किल॥ स्थूलास्यां शुभ्रवदनां रक्तां विभ्रतीं तनुं॥ वितत्तां रक्तनयनां रूक्षपिंगशिरोरुहां॥ स
मुनिर्विष्णुवाक्यात्तामंग॥ कृत्वाश्रमाश्रमं॥ वेदध्वनिसमाकृष्टमानयामास धर्मवित्॥ होमधूमसुगंधाढ्यं
वेदघोषनिनादितं॥ आश्रमं तत्समालोक्य व्यथिता साब्रवीदिदं॥ ॥ज्येष्ठाउवाच॥ ॥न हि वासोनुरूपोयं सदा वेद
ध्वनिर्यतः॥ नात्रागमिष्यामो ब्रह्मन्नयस्वान्यत्र मां ध्रुवं॥ ॥उद्दालकउवाच॥ ॥कथं नायासि किं चात्र वर्त्त
ते संमतं तव॥ तव योग्याश्च वसतिः का भवेद्ब्रुवदस्व तत्॥ ॥ज्येष्ठोवाच॥ ॥वेदध्वनिर्भवेद्यत्र तीर्थानां
चैव पूजनं॥ यज्ञदानादिकं चैव न च तत्र वसाम्यहं॥ परस्परानुरागेण दंपत्यं यत्र वर्त्तते॥ पितृदेवार्चनं य
त्र तत्र नैव वसाम्यहं॥ उद्यमानालिकुलैर्नु बुद्धिफलको पि यं वदः॥ धर्माचाररतो नित्यं तत्र नैव वसाम्यहं॥
रात्रौ दिवा गृहे यस्मिन् दंपत्योः कलहो भवेत्॥ निराशा यांत्यतिथयस्तस्मिन् स्थाने वसाम्यहं॥ दुरोदररता

यत्र परद्रव्यापहारिणः॥ परस्त्रीसेवनं यत्र स्थाने तत्र वसाम्यहं॥ इंद्रसज्जनविप्राणां मनो यत्र न दूय
॥३३॥ ते॥ निष्ठुरं भाषणं यत्र नित्यं तत्र वसाम्यहं॥ ॥सूत उवाच॥ ॥इति तद्वचनं श्रुत्वा उद्दालो मुनिसत्तमः॥ उद्दाल
कः पुनर्वाक्यं विश्लोः श्रुत्वा वचो विवान्॥ सो गच्छ यत्र तत्रापि पुनर्वाक्यं च सा ब्रवीत्॥ नायामीति ततः सोपि
भ्रमन्खेदातुरो भवत्॥ उद्दालकस्ततः खेदात्तदा लक्ष्मीमुवाचेह॥ उ अश्वमूलेस्मिन्नलक्ष्मी स्थीयतां क्षणं॥
यावद्योग्यं स्थानमालोक्यं यावदा स्याम्यहं पुनः॥ ॥सूत उवाच॥ ॥इति तां तत्र संस्थाप्य जगामोद्दालकस्तदा॥
प्रतीक्षापि चिरं तत्र यदा तं न ददर्श ह॥ तदा रुरोद करुणां भर्तृत्यागेन दुःखिता॥ तत्तस्याः क्रंदितं लक्ष्मीर्वैकुंठमु
वनेश्रृणोत्॥ तदा विज्ञापयामास विष्णुमुद्विग्नमानसा॥ ॥लक्ष्मीरुवाच॥ ॥स्वामिन्मद्भगिनी ज्येष्ठा भ
र्तृत्यागेन दुःखिता॥ तामाश्वासयितुं याहि कृपालो यदि अहं प्रिया॥ ॥सूत उवाच॥ ॥लक्ष्म्या सह ततो वि
ष्णुस्तत्र गच्छाद्रूपान्वितः॥ आश्वासयन्नलक्ष्मीं तां इदं वचनमब्रवीत्॥ ॥विष्णुरुवाच॥ ॥अश्वत्थवृक्षमा
साद्य सदालक्ष्मि स्थिरा भव॥ ममांशसंभवोप्येष आवासस्ते मया कृतः॥ प्रत्यब्दं चर्चयिष्यंति त्वां ज्येष्ठां गृहधर्मि
णः॥ तेषु हंस्त्रीः कनिष्ठा ते सदा तिष्ठति निश्चितं॥ शुक्रार्कवारे भौमे च मध्याह्ने निशि संध्ययोः॥ अश्वत्थ
स्पर्शनं नैव कारयेद्विबुधो जनः॥ अंगनाभिः सदा पूज्या बलिभिर्विविधैस्तथा॥ यः पठेच्छृणुयाद्वापि श्रावयेद्वा
नरोत्तमान्॥ अलक्ष्मीवृत्तमनघः स लक्ष्मीं लभते रति॥ ॥इति श्री पद्मपुराणे कार्तिकमाहात्म्ये एकोनविंशोध्यायः॥
॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥